CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
5.2.P.B.
Coll. No. 765

Title Yogānanda

CHUNILAL GANDHI VIDYABHAVAN, SURAT

*Shastri Dinmanishankar Pustak-Bhandara*

No.: 765 Subject: Vedānta.

Title: Yogānanda.

Author: Vidyāraṇya Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11.2" by 5.2" Extent: 32 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: —

॥श्रीगणेशायनमः॥ ॥नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥ ब्रह्मानंदाभिधंग्रंथंमादृ
ग्बोधसिद्धये॥१॥ चिकीर्षितस्यग्रंथस्यनिर्विघ्नपरिसमाप्तिपरिपंथिकल्मषनिवृत्तयेऽभि
मतदेवतानत्यानुसंधानलक्षणंमंगलमाचरन्श्रोतृप्रवृत्तिसिद्धयेसप्रयोजनमभिधेयमावि
ष्कुर्वन्ग्रंथारंभंप्रतिजानीते॥ ब्रह्मानंदेइति॥ निर्विशेषंपरंब्रह्मसाक्षात्कर्तुमनीश्वराः॥ येमंदास्ते
नुकंप्यंतेसविशेषनिरूपणैरिति॥ सविशेषब्रह्मरूपाणांदेवतानांतत्त्वस्यनिर्विशेषब्रह्मस्वरूप

ब्रह्मानंदेप्रवक्ष्यामिज्ञातेतस्मिन्नशेषतः॥ ऐहिकामुष्मिकानर्थव्रातंहित्वासुखायते॥

त्वाभिधानाब्रह्मणश्चानंदोब्रह्मेत्यादिश्रुतिभिरानंदरूपत्वाभिधानात्ब्रह्मानंदमित्यानंदरू
पस्यब्रह्मणोवाचकत्वात्प्रयोगेणवाग्विमनसाध्यायतितद्वाचावदतीतिश्रुतिप्रोक्तस्यायेन
ब्रह्मानुसंधानलक्षणंमंगलाचरणंसिद्धं ब्रह्मणश्चसर्ववेदांतप्रतिपाद्यत्वात्तन्निरूपणरूप
स्यास्यग्रंथस्याभिधेयविषयइतिब्रह्मशब्दप्रयोगेणविषयश्चसूचितः॥ ऐहिकेति॥ उक्त ब्रह्मा° १
रीत्यानिष्टनिवृत्तीष्टप्राप्तिरूपप्रयोजनद्वयंप्रदर्शितमविकं॥ ब्रह्मणोनंदेब्रह्मणोमानंदश्चे

तिब्रह्मानंदः॥ वाच्यवाचकयोरभेदोपचाराद्ब्रह्मप्रतिपादकोग्रंथोपिब्रह्मानंदस्तंप्रवक्ष्या
मीतितस्मिन्श्रुतिपाद्यप्रतिपादकरूपेब्रह्मानंदज्ञाने अवगतेसति॥ ऐहिकाः मुष्मिकानर्थव्रात
ऐहिकानांदेहपुत्रादिगृहंममाभिमानप्रयुक्तानामाध्यात्मिकादितापानांआमुष्मिकानांमुष्मि
न्परलोकेभवानांचतेषामनर्थानांव्रातसमूहः तमशेषतः निःशेषंयथाभवतितथाहित्वापरित्य
ज्यसुखायते॥ सुखरूपंब्रह्मैवभवति॥ ब्रह्मज्ञानस्यानिष्टनिवृत्तीष्टप्राप्तिहेतुत्वेश्रुतिस्मृ
तिवाक्यानिप्रमाणयन्नितिमेनीतिप्रदर्शयितुकामस्तावद्ब्रह्मविदाप्नोतिपरंश्रुतंह्येवमेभगवद्दृशे
भ्यस्तरतिशोकमात्मविदितिसोहंभगवःशोचामितंमाभगवान्शोकस्यपारंतारयत्वितिचवा
क्यद्वयमर्थतःपठति॥ ब्रह्मविदिति॥ ब्रह्मवेत्तीतिब्रह्मवित्परंतुकृष्टमानंदरूपंब्रह्मप्राप्नोति
आत्मवित्मंत्राद्युपाधिकालवस्तुपरिच्छेदशून्यंआत्मानंवेत्तीत्यात्मवित्॥ शोकंसंसा
रूढंपुरुषंशोचयतीतिशोकस्तमोमूलेःसंसारस्तंतरतिअतिक्रामतीतिनन्वहरत्वेतैत्तिरीय
केश्रुतिवाक्येब्रह्मज्ञानस्यपरप्राप्तिहेतुत्वेभावनासतेनानंदप्राप्तिहे

तुतेमाशंक्य सानंदप्राप्तिहेतुत्वप्रतिपादनपरं रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीति तैत्तिरीयश्रु
तिवाक्यमर्थतः पठति रस इति सत्यं ज्ञानमनंतं ब्रह्म तस्माद्वा एतस्मादात्मन आकाशः संभूत इति
प्रकरणे ते ब्रह्मात्मशब्दाभ्यामभिहितो य आत्मा स रसः स्वानंदरूप इत्यर्थः। रसमानंदरूपं ल

निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः। ये मंदास्तेऽनुकंप्यंते सविशेषनिरूपणैः॥१॥
ब्रह्मविन्परमाप्नोति शोकं तरति चात्मवित्। रसो ब्रह्म रसं लब्ध्वानंदी भवति नान्यथा॥२॥

लब्ध्वा ब्रह्माहमस्मीति ज्ञानेन प्राप्यानंदी भवतीति अपरिच्छिन्ननिरतिशयसुखवान् भवति। उक्त
मर्थं व्यतिरेकप्रदर्शनेन द्रढयति। नान्यथेति अन्यथा ब्रह्मात्मैकत्वज्ञानं विहाय साधनांतरानु ब्र॰
ष्ठानेन नानंदी भवतीत्यर्थः॥२॥ २

एवमन्वयमुखेनेष्टप्राप्तिः। अनिष्टनिवृत्तिप्रतिपादनपराणि वाक्यानि प्रदर्श्य व्यतिरेकमाह मन
र्थनिवृत्तिप्रदर्शनपरं यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदते अथ सो
ऽभयं गतो भवति। यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवतीति वाक्यद्वयमर्थतोऽनुक्रा
मति। प्रतिष्ठामिति। अस्यायमर्थः। यदा यस्मिन्काले हि निविदन् [illegible] हि शब्दः निपातो निपातः।
वेत्ययमेवानर्थनिवृत्त्युपायो नान्य इति नियमनार्थः। एष इत्युक्तः एतस्मिन्निदं तु अनवगम्य अदृ

प्रतिष्ठां विंदते स्वस्मिन्यदा स्यादथ सोऽभयः। कुरुतेऽस्मिन्नंतरं चेदथ तस्य भयं भवेत्॥४॥ य

श्यं दृग्गोचरं तच्च अनात्म्यमनात्मीयं स्वरूपत्वात् स्वकीयत्वरहितम् अनिरुक्ते निरुक्तं निर्वचनं शब्दा
भिधानं यत्र नास्ति तदनिरुक्तं तस्मिन् अनिलयने विलीयतेऽस्मिन्निति निलयनमाधारः सर्वाधि
ष्ठाने यस्मात्तस्मिन्नसमहिम्नि स्थितं तदित्यर्थः। अभयमद्वितीयं द्वितीयाद्वै भयं भवतीति श्रुतेर्भयकारणशून्य
त्वेन यद्वेदांतैः प्रस्थितेन विद्यते न यस्मिन्नेतोऽभयं यथा भवति तथा प्रतिष्ठां प्रकर्षेण संशयविपर्ययराहि
त्येन स्थितिः ब्रह्माहमस्मीत्येवमवस्थानं प्रतिष्ठां विंदते गुरूपसत्त्यादिना श्रवणादिकं कुर्वाणो लभ

ते: यत्तदानीमेव ब्रह्मणएवं विज्ञानं येन परहितं मोहरूपमद्वितीयं: प्राप्तो भवति। ब्रह्म वेद ब्रह्मैव
भवतीति श्रुतेः। यदा यस्मिन्नेव काले तापः पूर्वोक्तः एतस्मिन्नदृश्यत्वादिगुणके ब्रह्मणि ब्रह्मणि उ
दिति निपातोपि अर्थः। अरमल्पमपि अंतरं भेदं उपास्योपासकादिलक्षणं कुरुते पश्यति ध
तूनामनेकार्थत्वात् यत्तदानीमेव तस्य भेददर्शिनो भयं संसारप्रयुक्तं दुःखं भवति॥ भेददर्शिनां
भवतीत्येतद्दृढीकर्तुं ब्रह्मात्मैकत्वज्ञानरहितानां वाय्वादीनां भयप्रदर्शनपरं नीपात्माध्यानः पर्वत

वायुः सूर्यो वह्निरिंद्रो मृत्युर्जन्मांतरेंऽतरं। कृत्वा धर्मं विजानंतोप्यस्माद्भीताश्चरंति हि॥५॥

त्यादिमं श्लोकमर्थतः पठति। वायुरिति। वाय्वादयो जगन्नियामकत्वेन प्रसिद्धाः पंचापि देवताः अतीते
जन्मनि धर्मं मिष्टापूर्तादिलक्षणं विजानंतोपि ज्ञानपूर्वकमनुष्ठितवंतोपि अल्पमंतरं भेदं ब्रह्मणोर्ने
दं कृत्वा अस्माद्ब्रह्मणो भीता भिन्न वाय्वादिजन्म निरंतरं तिसमापारभ्युदयकर्मेति इत्यादि भवनेयादस
भिक्षापतिनयपत्नपतिमर्थः नयादि श्रु वायुश्च मृत्युश्चावति पंचम इत्यादि यस्मात्तस्माद्यमेनोको ब्रला
ब्रह्मसिद्धिर्दृष्टव्येति॥५॥ ३

ननु नरतिर्लोकमात्मविदिसुराहत वाक्येषु ब्रह्मानंदज्ञानस्यानर्थनिवृत्तिहेतुत्वं स्पष्टं न्यक्तं नामत
इत्याशंक्य तथा प्रतिपादनपरं वाक्यमुदाहरति। आनंदमिति। रोहिणिरह इति वृत्तेर्दपवेदेशश्लोकप्रथ ४
रिकः ब्रह्मणः स्वरूपभूतमानंदं विद्वान् पूर्वोक्तया ज्ञानमुरूपः कुतश्चन कस्मादपि ऐहिकस्य
हेतोः आदेः पारलौकिकस्य हेतोः पापादेर्वा न बिभेति भयं न प्राप्नोति। ननु तत्स्वदृष्टापादने यत्को॥

आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चन॥ एतमेव तपेन्नैषा विद्या कर्माग्निसंततः॥६॥

त्रीति एतं कुतः वागम्यत इत्याशंक्य तत्प्रतिपादकं एतं ह वाव न तपति किमहं साधु नाकरवं
किमहं पापमकरवमिति वाक्यमर्थतः पठति। एतमिति। कर्माग्निसंतप्ता पुण्यपापरूपकर्मै
वाग्निस्तत्करणाकरणाभ्यामग्निवत्संतापहेतुत्वात्तेन संतप्ता संपादिता एषा पुण्यं नाकरवं कर
मात्मापं तु कृतवान् कुत इत्येवंरूपा चिंता एतमेव न तपेत् न संतापयेत्। नाभ्यन्न विद्यासमनु
नया सदासंतप्यत इत्यर्थः॥६॥

पुण्यपापयोस्तापकत्वे हेतुप्रदर्शनपरं स य एवं विद्वानेते आत्मानं स्पृणुते उभे ह्येवैष एते आत्मानं स्पृ
णुत इति वाक्यमर्थतः पठति। एवमिति। सदा कर्मस्मरणेनोक्तेन प्रकारेण स य आत्मानं पुरुषो
यं श्रुत्याहितस्तामेकं अनेन प्रकारेण विद्वान् जानन् वर्तते स एते पुण्यपापे हित्वैव सर्वाहारात्मानं
ब्रह्माभिन्नं प्रत्यंचं स्पृणुते। प्रीणयति मरणमरे दिनर्षु। यतः पुण्यपापयोर्मिथ्यात्वानुसंधानेन हि

एवं विद्वान् कर्मणी हित्वात्मानं स्मरेत्सदा। कृते च कर्मणी स्वात्मरूपेणैव प्रपश्यति॥७॥

नं कृतं कृतवान् विषयादिचिंतनेदनात्मेति कृतस्तन्निमित्तकं स्वात्मापश्यतीत्यभिप्रायः। किंच एष विद्वाने
ते पूर्वोक्ते उभे पुण्यपापरूपे कर्मणी देहेंद्रियादिप्रवर्तिनी नित्ये स्वात्मरूपेणैवेदं सर्वं यदयमात्मे
त्यादिवाक्योक्तप्रकारेण प्रपश्यति जानातीत्यर्थः। अतः स्वात्मा नित्यत्वादप्यतापकत्वमिति भावः॥७॥ श्रुत्या
५

ननु नानेकं क्षीयते कर्म कल्पकोटिशतैरपि इत्यादिशास्त्रसद्भावादनादौ संसारे बहुजन्मोपार्जि
तेषु पुण्यापुण्यलक्षणेषु कर्मसु संचिताख्यातेषु प्रसिद्धत्वेनात्मतयाऽनुसंधानायोग्येषु सत्सु क
थं तद्विषयाचिंतानवेदित्वाच्चाकर्मनिराकरणानंते पांतत्त्वज्ञानेन विनाशितत्वाच्च चिंताजनकमि
त्यभिप्रायेण हृदयग्रंथ्यादिनिवृत्तिपरं मुंडकादिश्रुतिमुख्यं तद्वाक्यं पठति। परावरे परमपि
हिरण्यगर्भादिकं पदमवरं निकृष्टं यस्मात्तस्मिन्परात्मनि दृष्टे साक्षात्कृते अहमस्मीति साक्षात्कारव

भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः। क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे॥८॥

तो हृदयस्य बुद्धेरविद्यात्मकस्य ग्रंथिवद्दृढसंश्लेषरूपत्वाद्ग्रंथिरहमात्माध्यासो भिद्यते विदीर्यते वि
नश्यतीत्यर्थः। आत्मा देहादिभ्यो व्यतिरिक्तो न वा व्यतिरिक्तोऽपि कर्त्रादिधर्मयोगी न वा कर्तृत्वेऽपि त
स्य ब्रह्मणो भेदोऽस्ति न वा अभेदेऽपि तज्ज्ञानं कर्मादिसहितं मुक्तिसाधनं केवलं वेत्यादयः संशयाः छिद्यंते छि
द्यंते तत्त्वतः साक्षात्कृतस्य वस्तुनः संशयविपर्ययविषयत्वादर्शनादिति भावः। कर्माणि
संचितानि पुण्यापुण्यलक्षणानि क्षीयंते तन्निदानाज्ञानविनाशेन विनश्यंतीति॥८॥ ५

न तु कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे विद्यां
चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते इत्यादिश्रुतेः कर्मणैव हि
संसिद्धिमास्थिता जनकादयः। यथान्नं मधुसंयुक्तं मधु चान्नेन संयुतं। एवं तपश्च विद्या च संयुक्ते भे
षजं महत् इत्यादिस्मृतेः केवलस्य ज्ञानस्य समुच्चितं वा कर्मणो मुक्तिहेतुत्वं स्यादित्याशंक्योक्त
तत्र कस्य लेपितपापस्य पापनिवृत्तिपरतात्स्यास्थित इतिश्च ज्ञातस्य पापनिवृत्तिपरत्वा

तमेव विद्वानत्येति मृत्युं पंथा न चेतरः ॥ ज्ञात्वा देवं पाशहानिः क्षीणैः क्लेशैर्न जन्म नाकः ॥१९॥

कर्मसिद्धिरावश्येन च ज्ञानसाधनत्वं श्रुत्यभिधानात् विद्यासाहेन चोपासनाया विवक्षितत्वान्न कर्मणो
मुक्तिसाधनतामित्यभिप्रायेण साधनांतरनिषेधपरं तमेव विदित्वाऽतिमृत्युमेति नान्यः पंथा विद्यतेऽय
नायेति श्वेताश्वतरवाक्यमर्थतः पठति तमेवेति तं सर्वोक्तं परमात्मानं विद्वानेव मृत्युं संसारमत्येति
अतिक्रामति इतरः समुच्चयरूपः केवलकर्मरूपो वापि पंथा मार्गो मोक्षोपायो नैव विद्यते नान्य श्वेता
इत्युक्तानुष्ठितिश्च यस्मात्तेरेकान्तमैहिकानिष्टनिवृत्तिरेव बाधाभ्येनामत्रानैनामुष्मिकीस्मा ५

र्गकामुष्मिकस्यानिष्टस्यनादिजन्मपूर्वकत्वात्तस्य निदानस्याभावं प्रतिपादकं ज्ञात्वा देवं सर्वपाशाप
पहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः इति श्वेताश्वतरवाक्यमर्थतः पठति ज्ञेति देवं स्वप्रकाशं ब्रह्मा
भिन्नं ब्रह्म ज्ञात्वा परोक्षतयानुभूय स्थितस्य कामक्रोधादिकासर्वेषां पाशानां हानिर्भवति नैपाशाभि
धेयैः रागादिभिः क्लेशैः क्षीणैर्नष्टैर्नापि जन्महेतुकर्मरिनायागान्तत्तज्जायेतेत्यर्थः ॥१९॥ ननु श्रो

देवं मत्वा हर्षशोकौ जहात्यत्रैव धैर्यवान् ॥ नैनं कृताकृते पुण्यपापे तापयतः क्वचि
त् ॥२०॥

कत्तरणादिफलं श्रूयते एवं नानुभूयते ज्ञानिनामपीष्टानिष्टप्राप्तिपरिहारार्थं प्रवृत्तिदर्शनादि
त्याशंक्यानन्दपरोक्षज्ञानिनां तदभावं प्रतिपादनपरमध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशो
कौ जहातीति कठवाक्यमर्थतः पठति देवमिति धैर्यवान् ब्रह्मचर्यादिसाधनसंपन्नो देवं
चिदानंदादिलक्षणं मत्वाऽवगम्यात्रैवास्मिन्नेव जन्मनि हर्षशोकौ जहाति ॥ एतमेव न तपेत्येषा चिंतां

कर्माग्निसंस्मृतेस्तु कार्ये विशेषप्रदर्शनपरं नैनं कृताकृते न तपतः इति याज्ञवल्क्यब्राह्मणवा
क्यमर्थतः पठति ॥ नैनमिति ॥ पूर्वमकृतं पुण्यं कृतं च पापं न तद्विदस्तापहेतुर्न भवतीत्युक्तं इ
ह तु कृतमकृतं वा पुण्यं पापं वा तथाविधं तापकं न भवतीत्युच्यते इति विशेषः ॥ तथाहि तापो नाम
चित्तविकारविशेषः ॥ पुण्यं कृतं सद्धर्षलक्षणं विकारमुत्पादयति अकृतं विषादं पापं पुनस्त
द्वैपरीत्येनाकृतं हर्षमुत्पादयति कृतं विषादं ॥ न तत्त्वविदस्तूभे अपि पुनरुक्तविधविकारहेतू
न कदाचिद्भवतः ॥ अविक्रियब्रह्मरूपत्वज्ञानादित्यभिप्रायः ॥ १० ॥ ॥



नन्वियं सैव वाक्यानि प्रमाणानि केमानि इत्यादि श्रूयते अस्मिन्नात्मा दिव्योऽहं वेद वेदीरूप सत्समन्ति
न्येवेदिह्या वेदीत्य इति विनष्टिः ॥ य एतद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ति तमेवं विद्वानमृत
इह भवति सएव तदनवतं नान्यत्कर्तनं मृत्युमुखाल्लमुच्यते इत्याद्याः श्रुतयो गृह्यन्ते ॥ सर्वभूत
स्थमात्मानं सर्वभूतानि चात्मनि संपश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छति ॥ इत्यत्र तस्मादात्मविज्ञाना
द्विशुद्धिः परमा मतेत्यादि पुराणस्मृतिवचनैः सह प्रमाणानीत्यर्थः ॥ उदाहृतानां श्रुतिस्मृतिवाक्या

इत्यादिश्रुतयो बह्व्यः पुराणैः स्मृतिभिः सह ॥ ब्रह्मज्ञानेऽनर्थहानिमानंदं चाप्यघोषयन् ॥
॥ ११ ॥ आनंदस्त्रिविधो ब्रह्मानंदो विद्यासुखं तथा ॥ विषयानंद इत्यादौ ब्रह्मानंदो विविच्यते ॥ १२ ॥

तेषां सर्वेषां तात्पर्यमाह ॥ ब्रह्मज्ञानेति ॥ ननु ब्रह्मानंदपदे ब्रह्मन् विशेषणेन तदन्यस्यानंदस्यास्तित्वं गम्य
ते ॥ स कतिविधः कीदृशश्चानंद इत्याकांक्षायां तद्भेदप्रदर्शनपूर्वकं ब्रह्मानंदविवेचनं प्रतिजानीते
॥ १२ ॥ आनंद इति ॥ ब्रह्मानंदो विद्यानंदो विषयानंद इत्यनेन प्रकारेणानंदस्य त्रैविध्यमवगन्तव्यं
तत्रैतेष्वानंदेषु ब्रह्मानंदमुख्यत्वादादावध्यायत्रयेण ब्रह्मानंदो विविच्य प्रदर्श्यत इत्यर्थः ॥ १२ ॥

मंवद॰
७

तत्रादौतावत्तैत्तिरीयश्रुतिपर्यालोचनयामानंदरूपंब्रह्मावगम्यतइत्यभिप्रायेणभृगुवल्ल्या
र्थंसंक्षेपेणदर्शयति।भृगुरिति।भृगुनामकःपुत्रःपितुर्वरुणात्ब्रह्मलक्षणंयतोवाइमानिभूता
निजायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंतितद्विजिज्ञासस्वतद्ब्रह्मेत्येवंरूपंश्रुत्वाऽन्नम
यादिकोशेषुतल्लक्षणसंगमनेनतेषांमब्रह्मत्वनिश्चित्यानंदमानंदमयकोशेपंचमावयवत्वेन

भृगुःपुत्रःपितुःश्रुत्वावरुणाद्ब्रह्मलक्षणं।अन्नप्राणमनोबुद्धिस्त्यक्त्वानंदंविजज्ञिवान्॥१३॥
आनंदादेवभूतानिजायंतेतेननीवनं।तेषांलयश्चतत्रादोब्रह्मानंदेनसंशयः॥१४॥

ब्रह्मपुच्छंप्रतिष्ठेतिश्रुतिंबिभ्रत्तमानंदंब्रह्मलक्षणयोजनयाब्रह्मत्वेनज्ञातवानित्यर्थः॥१३॥कथ
मानंदेतल्लक्षणंयोजितवानित्याशंक्यतद्योजनाप्रकारंदर्शयन्परं आनंदाद्ध्येवखल्विमानिभूतानिजायं
तेआनंदेनजातानिजीवंतिआनंदंप्रयंत्यभिसंविशंतीतिवाक्यमर्थतःपठति।आनंदादिति।ग्राम्यधर्म
निमित्तकादानंदादेवभूतानिप्राणिनोजायंतेउत्पद्यंते।तेनविषयभोगादिनिमित्तकेनानंदेनजीवनं
प्राप्नुवंति।तेषांप्राणिनांलयश्चतत्रैवसुषुप्तिकालेनसंशयः ब्रह्म॰
७

प्रभूतेऽस्मिन्नानंदएवभवतिसुषुप्तावानंदातिरेकेणकस्याप्यननुभवान्नावादत आनंदोब्रह्मैवसर्ववस्तुनव
किंचिन्नात्रसंशयःकर्तव्यइतिभावः॥१४॥एवंतैत्तिरीयश्रुतिपर्यालोचनयाब्रह्मणआनंदरूपतां
प्रदर्श्यछांदोग्यश्रुतिपर्यालोचनयापितांदर्शयिषुःसनत्कुमारनारदसंवादरूपेसप्तमाध्यायेस्थि
तस्यभूमस्वरूपब्रह्मप्रतिपादकस्ययत्रनान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजानातिसभूमेत्यादिवाक्य
स्यार्थंसंक्षेपेणदर्शयतिभूतोऽन्यत्रेति।भूतानामाकाशादीनांतत्कार्याणांजरायुजांडजादीनांचोमत्रेऽ

भूतोऽन्यत्रेःपुरस्तुमात्रिपुटीद्वैतवर्जनात्।ज्ञातृज्ञानज्ञेयरूपत्रिपुटीप्रलयेहिना॥१५॥

वैत्रिपुटीद्वैतवर्जनात्।त्रयाणांज्ञातृज्ञानज्ञेयरूपाणांनामाकाराणांसमाहारस्त्रिपुटीसैवद्वैतंतस्यवर्ज
नमभावस्तस्मात्।भूमादेशतःकालतोवस्तुतोवापरिच्छेदशून्यःपरमात्मा।नावानयनेश्यानयन्नमितिम्या
याद्युमौवामीत्यध्याहारः।तदेतत्द्वैतवर्जनमुपपादयति ज्ञातृज्ञानेति।वक्ष्यमाणज्ञात्रादित्रि
पुटीविषयकाज्ञानाभावस्तत्सर्वविशेषंनसंभवनमितिहिशब्दंप्रयुंजानस्यायमभिप्रायः॥१५॥

इदानीं ज्ञात्रादिस्वरूपं दर्शयति। विज्ञानमय इति। परमात्मन उत्पन्नो बुद्ध्युपाधिको जीवो विज्ञानम
यः। ज्ञाता मनोमयः मनसि प्रतिबिंबितं मनोमयः। शब्दवाच्यं चैतन्यं ज्ञानं शब्दस्पर्शादयो ज्ञेयाः प्रमिता
इदं त्रयं कार्यत्वादुत्पत्तेः पुरा कारणव्यतिरेकेण नासीदित्यर्थः।।१२।। फलितमाह त्रयेति। ज्ञात्रादि
त्रयाभावे निर्द्वैतः द्वैतरहितः पूर्ण एवात्मानुभूयते। कुत्रानुभूयत इत्यत आह। समाधीति। विद्वदनु

विज्ञानमय उत्पन्नो ज्ञाता ज्ञानं मनोमयः।। ज्ञेयाः शब्दादयो नैतत्त्रयमुत्पत्तितः पुरा।।१२।। त्रया
भावे तु निर्द्वैतः पूर्ण एवानुभूयते। समाधिसुप्तिमूर्छासु पूर्णः सृष्टेः पुरा तथा।।१३।।

भवदृष्ट्यान्वयसमाधिग्रहणं सर्वजनबोधनाय सुषुप्तिमूर्छयो ग्रहणं। सुप्त्यादौ प्रतीतस्य द्वै
तदर्शनं स्मरणेनान्यथानुपपत्त्या निर्द्वैतं प्रत्यदनुभवितुरस्तीति भावः। ननु तु सुप्त्यादावद्वैतसिद्धि
ः प्रकृते किमायातमित्यत आह पूर्ण इति। यथा सुप्त्यादौ परिच्छेदकाभावात्पूर्णस्तथा सृष्टेः पुरापि ब्रगी
तदभावादित्यर्थः।।१३।। ८

स्वरूपं ब्रह्मणः पूर्णत्वमानंदरूपत्वे किमायातमित्याशंक्यान्वयव्यतिरेकाभ्यां भूमैव सुखस्वरूपत्वं प्रद
र्शनपरं यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति वाक्यमर्थतोनुक्रामति। यो भूमेति। यः पूर्वोक्तो भूमा स
सुखस्वरूप एव अन्यद्वितीयोऽल्पः स्वेतरस्य व्यावर्तात्मना परिच्छिन्नस्तस्य विवरणं त्रेधा विनिर्दिशन्निति हेतुग
र्भविशेषणं सुखं न तत्र विद्यत इत्यर्थः। एवं कस्मै केनानिदिष्टमित्यत आह। सनत्कुमार इति। नारदस्य

रंव यो भूमा स सुखं नाल्पे सुखं त्रेधा विनिर्दिशन्। सनत्कुमारः प्राह देवर्षयेऽतिशोकिने।।१४।। नार
स्य पुराणान्पंच वेदान्शास्त्राणि विविधानि च। ज्ञात्वाप्यनात्मवित्त्वेन नारदोऽतिशुशोच ह।।
१५।।

शिष्यस्य तत्कारणमाह। अतिशोकिन इति। अतिशायितः अधिकः शोको यस्यास्तीत्यतिशोकी तस्मै।।१४।।
तस्यातिशोकित्वे हेतुमाह। सपुराणानीति। नारदः पुराणैः सह वर्तंत इति सपुराणाः पंच वेदाः शास्त्रा
णि विविधानि च शास्त्राणि विदित्वाप्यात्मज्ञानरहितत्वेनातिशायेन शोकं प्राप्तः।।१५।। ननु वेदशास्त्र
विषयज्ञानस्य शोकनिवर्तकत्वेन प्रसिद्धस्य कथमतिशोकहेतुत्वमित्यत आह।।

वेदाभ्यासादिति। तापत्रये णाध्यात्मिकादिलक्षणेनैव केवलं शोकिता शोकोऽस्यास्तीति शोकितस्य नादस्तेर
नाध्यात्मादिस्थाधाहारः पश्चादिति तु शब्दो विशेषद्योतनार्थः। अभ्यासः पाठस्तस्य विस्मारं नं। विस्मारः पठि
तस्य विस्मरणं भंगः स्वतोऽधिकेन तिरस्कारः गर्वोस्मिन् दर्शनेन स्वाधिक्यबुद्धिः। एतैः प्रकारैः शो
किता। नन्वेवं सर्वज्ञस्यापि नारदस्याति शोकित्वं जातमिति कुतोऽवगम्यत इत्याशंक्य सोहमिति

वेदाभ्यासात्पुरा तापत्रयमात्रेण शोकिता। पश्चात्त्वभ्यासविस्मारभंगगर्वैश्च शोकिता ॥ ४ ॥
सोऽहं विद्वन् शोचामि शोकपारं नयाचमां। इत्युक्तः सुखमेवास्य पारमित्यभ्यधादृषिः ॥ ५ ॥ सुखं
वैषयिकं शोकसहस्रेणावृतत्वतः। दुःखमेवेति मत्वाह नाल्पेऽस्ति सुखमित्यसौ ॥ ६ ॥ वृद्धः शोचामी

तिमित्यस्मिन्नेवतं तं माह स्वदीयादेव वाक्याद्देवगतं भगवान् शोकस्य पारं नारयति निरतिशयसुखप्राप्ते
नपुर्हे मतिस्मन् कुमारोऽनुसमाश्रवाज्ञ सुखस्वरूपं ब्रह्मैव ज्ञायमानं शोकनिवृत्त्युपाय इति सुखमेव निर्दिशता।
मितत्र भिन्नारमोऽरयं यमर्दतेऽणेक्रवानिमाह। सोऽहमिति। ननु स्वर्गादिलक्षणेषु सुखेषु बहुषु सुखं
कास्मे सुखमस्तीति सुखिरनुपपन्नमिति चेत् नतेषां स्वर्गादीनां दुःखानुषंगेण विषयसंपर्कान्नवबहुदुःखम
त्वमस्य मुनिनाभिज्ञेनत्वादिमाह। सुखमिति ॥ ६ ॥ भूमा ८

द्वैते सुखानादमंगीकृत्याद्वैतेऽपितमाशंकते ननु नेति। तत्रानुपलब्धिं प्रमाणयति अस्ति चेदिति स्वद्वै
तेयदि सुखं विद्यते तर्हि विषयसुखादिवदुपलभ्येत यतो नोपलभ्यते ततो नास्तीत्यर्थः। ननु प्रत्यक्षमतः स्वा
दंक्रमाने प्रमाह। तथेति। स्वप्रसुप्तवस्थानुभवि सुप्तवस्थास्तापेक्षतादद्वैतहानिरिति भावः ॥ ७ ॥ स्वद्वै
तस्य सुखाधिकरणत्वनिषेधमंगीकरोति सिद्धांती। मास्त्विति। तत्र हेतुमाह। किंतु सुखमद्वैतमिति। द्विय

ननु द्वैते सुखं मा भूदद्वैतेऽप्यस्ति नो सुखं। अस्ति चेदुपलभ्येत तथा च त्रिपुटी भवेत् ॥ ८ ॥ मास्तु
द्वैते सुखं किंतु सुखमद्वैतमेव हि। किं मानमिति चेन्नास्ति मानाकांक्षा स्वयंप्रभे ॥ ९ ॥ स्वप्रकाशेऽपि तद्वि
गतवाक्यं मानयन्यथामिदं वादिनिरासः। अद्वैतमनुपेत्याभिन्न सुखं नास्तीति भाषते ॥ १० ॥

स्यात्कारणादद्वैतमेव सुखं। अतः सुखाधिकरणत्वं न वक्तव्यमित्यर्थः। अद्वैतं सुखमित्यत्र किं प्रमाणमि
त्याशंक्यानुवादपूर्वकं तस्य स्वप्रकाशत्वाभ्यामागमप्रमाणवानुपपन्न इत्याह। किं मानमिति चेदिति।
स्वप्रभेति। तदुपपादयति यानि। यस्मादिति। यतः कारणात् भवता प्रमाणेनैरपेक्षेण अद्वैतमनु
पेत्य सुखमेवाद्वैतमपि इत्यन्तः स्वानन्तमित्यर्थः। ननु स्वप्रकाशकत्वेऽपि किं प्रमाणमित्याशंक्य भवदीयमे
ववचनं प्रमाणमित्याह ॥ १० ॥

मयाऽद्वैतमभ्युपगम्यते। किंतु त्वदुक्तमद्वैतमनुपपन्नमिति। नोनोक्तसिद्धिरितिशंकते नाभ्युपैमी
ति विकल्पासहत्वाददैतानभ्युपगमोऽनुपपन्न इतिमन्वानः पृच्छति ॥१२॥ किं त्वदभिमतं विक
ल्पं दर्शयति किमद्वैतं इति। तृतीयं पक्षं निराकरोति। अद्वैतसिद्ध इति। द्वैताद्वैतविलक्षणस्वरूपस्य
लोके दर्शनादिति भावः। द्वितीयं पक्षं निराकरोति। न द्वितीय इति तत्र हेतुमाह। अननुभवेऽप्रति

नाभ्युपैम्यहमद्वैतं त्वद्वचो नूद्यलक्षणं। पृच्छामि त्वं तदा ब्रूहि किमासीद्द्वैततः पुरा॥१३॥
मद्वैतमद्वैतमन्वावाक्यो द्विस्तिमः। अद्वैतसिद्धो न द्वितीयोऽननुभवेः क्षिप्यते मिमः॥१४॥ अद्वै
तसिद्धिर्यद्यवेवनानुभवेतिचेदहा। निर्दृष्टांतासदृष्टांताद्वा कोद्यतरमत्वयोनोः॥१५॥

द्वैतस्यतदानीमनुभवत्वादिति भावः। अन्तः प्रथमः पक्षः परिशिष्यते इति ॥१०॥ ननु केन प्रकारेणाद्वैत
युक्तैव सिद्ध्यति अननुभवेनेति चोदयति। अद्वैतेति। अद्वैतसिद्धिर्युक्त्यैवेत्युक्ते विकल्पाः सहत्वादनुपप
न्नमिति मन्वानो युक्तिं विकल्पयति सिद्धांती वदेति। विकल्पमनूद्यतं निराकरोति कोद्यतरमिति ॥ १०
प्रथमं पक्षं सोपहासं निराकरोति॥

नानुभूतिरिति। अद्वैतसिद्धिर्युक्त्यैवेति वदताऽनुभूतिरभावनाम्यपयते यत्किंचिद्दृष्टांतमदर्शयित्वा म
तरेण न किंचित्साधयति अतो न दृष्टांतशून्या युक्तिर्युक्तेति भावः। द्वितीये विकल्पे तु न यदादि संभवति य
द्वा दृष्टांतो वक्तव्य इत्याह। सदृष्टांतेति ॥१८॥ तर्हि दृष्टांतेनैवाद्वैतं साधयामीति शंकते पूर्ववादी। अद्व
ैत इति। द्वयलयो द्वैतरहितो न वितुमर्हति द्वैतानुपलब्धिमत्वात्। योयो द्वैतानुपलब्धिमान् स अद्वैत

नानुभूतिर्न दृष्टांत इति युक्तिस्तु शोभते। सदृष्टांततत्पक्षेतु दृष्टांतं वद मे मतं॥१६॥ अद्वैतः
द्वयलयो द्वैतानुपलंभेन सुप्तिवत्। इति चेत्सुप्तिरद्वैतेत्यत्र दृष्टांतमीरय॥१७॥ दृष्टांतः पर
सुप्तिश्चेद् दृष्टोतेकोऽत्र लंमहत्। यः स्वसुप्तिं न वेत्त्यस्य परसुप्तौ न का कथा॥१८॥ ॥

रहितः यथा स्वापः इति। नन्वेवं साधयतस्तव स्वसुप्तिर्दृष्टांतः परसुप्तिर्वा आद्ये तस्याः परं प्रत्यसिद्धत्वे
न तत्सिद्धये दृष्टांतांतरं वक्तव्यमित्याह। सुप्तिरिति ॥ ननु तस्याः परसुप्तिरेव दृष्टांत इति द्वितीयं विक
ल्पमाशंकते। दृष्टांत इति। परसुप्तेस्त्वत्प्रत्यक्षत्वेन त्वया दृष्टांतीकरणमनुपपन्नमिति सोपहास
माह सिद्धांती। अत्र इति। यो न वा स्वसुप्तिरनुभवगम्यत्वानंगीकारेण स्वसुप्तिमपि न वेत्ति तस्य तत्र परसुप्तौ
का कथा परसुप्तिज्ञानं न भवतीति किमु वक्तव्यमिति भावः॥१२॥

ननु सुखस्यानुमानात्सुषुप्तिसिद्धिरिति शंकते। निश्चेष्टेति। विमतः परसुप्तो न वितुमर्हति प्राणादिमत्वे
सति निश्चेष्टत्वात् मद्वदित्यनुमानादित्यर्थः। एवं तर्हि तत्त्वमस्यैः स्वप्रकाशत्वपरिशेषेण त्वया सिद्धा
ती। तदेति उदाहर्तुरिति। तदा तर्हि मां प्रति स्वसुषुप्तिमुदाहर्तुर्दृष्टांतीकर्तुं त्वत्तव सुप्तिः स्वप्रत्यक्षस्वप्रका
शत्वं बलात्सुषुप्तिदारणमामपगतिं वेन वेत् ॥ २२ कथं वा प्रवर्तमानाशंक्याह नेंद्रियाणीति। सुषुप्तिग्राहका

निश्चेष्टत्वात्परः सुप्तो यथाहमिति चेत्तदा। उदाहर्तुः सुषुप्तेस्ते स्वप्रमात्वं बलाद्भवेत् ॥ २३ ॥
नेंद्रियाणि न दृष्टांतस्तथाप्यंगीकरोषि तां। इदमेव स्वप्रमात्वं यद्ज्ञानं साधनैर्विना ॥ २४ ॥

णींद्रियाणि न संगतिस्तेषां स्वकारणे विलीनत्वात् दृष्टांतश्च असंप्रतिपन्नो नास्ति परमेरप्रसिद्धत्वस्य सोकत्वात्तथापि
तां सुप्तिमंगीकरोषि एवं च प्रमितिसाधनैर्विना ज्ञानसाधनमंतरेण यद्भानं प्रकाशनमिति यदिदमेव स्वप्रमा
त्वं सुषुप्तेरित्यर्थः। अत्रायं प्रयोगः। विमता सुप्तिः स्वप्रकाशा प्रमाणपि ज्ञानसाधनेषु प्रकाशमानत्वात् ब्रह्मा.
त्मा निमत्तात्मवत्स्वाभाकरानिमतत्त्वमंवेदन वत्त्वात्मानिमत स्वात्मवदित्यर्थः ॥ २३ ॥ ॥ ११

दृष्टांतप्रलयस्य दृष्टांतत्वेनोदाहृतायाः सुषुप्तेरद्वैतत्वं स्वप्रमत्वं च प्रसाध्य तत्र सुखप्रसाधनाय पूर्वप
क्षिणाऽऽकांक्षामुत्थापयति। कामं दैतेति। सुखप्रतियोगिनो दुःखस्य तदानीमसत्त्वात् सुखमेव परिशि
ष्यत इत्याह। मैवमिति। सुखदुःखयोः प्रकाशतमसोरिव परस्परविरोधित्वात् दुःखाभावे सुखमेवावश्यं
मिति भावः। सुखी दुःखाभावे किं मानमित्याकांक्षायां श्रुत्यनुभवाविमाह्याध्यंधेति। तस्मात्एतं सेतुं

स्वाभावे तस्य प्रमात्वेऽवदत्सुखी सुखं कथं। शृणु दुःखं तदा नास्ति ततस्ते प्रियते सुखं ॥ २४ ॥ अंध
सः सन्नप्यनंधः स्याद्विद्धो विद्धोऽथ रोग्यपि। अरोगीति श्रुतिः प्राह तच्च सर्वजना विदुः ॥ २५ ॥
न दुःखाभावमात्रेण सुखं लोष्टशिलादिषु। द्वयाभावस्य दृष्टत्वादिति चेद्विषमं वचः ॥ २६ ॥

तीत्यां। अंधः सन्ननंधो भवति विद्धः सन्नविद्धो भवति उपतापी सन्ननुपतापी भवति तद्यथा पीदं न गवत्स्त्रा
रीरमंधं भवत्यनंधः सन्न भवतिमादिश्रुतिर्दृष्टान्निमानप्रयुक्तानंधत्वादीन्दोषान्सुप्तो निवारयति। मा धा
त्रिगांपीडमानस्यापि सुप्तौ तदुःखानुभवो नास्तीति तत्सर्वजनप्रसिद्धं चेत्यर्थः ॥ २५ ॥ ननु यत्र दुःखा
भावस्तत्र सुखमित्यस्याः व्याप्तेर्लोष्टादौ व्यभिचार इत्याशंकते नदुःखेति। दुःखाभावमात्रेण सुखं कल्प्य
यितुं न शक्यते लोष्टशिलादिषु द्वयाभावस्य सुखदुःखयोरभावस्य दर्शनादित्यर्थः दृष्टांतसाम्यं तिकै यो

वैषम्यान्नैवमिति परिहरति॥ विषयेति॥ वचो दृष्टान्तवचनं विषमं दार्ष्टान्तिकात्॥ ननु शरीरस्य दृ-
ष्टान्तस्यानुकूलत्वमेवोपपादयति॥ सुखेति॥ अन्यनिष्ठयोर्दुःखसुखयोरुद्भवं यथा कंसे सुखदे-
नविकारान्मां लिंगमां कर्त्तंसं स्वयं दुःखी विषण्णवदनतां संप्रतिपन्नवत् स्वयं सुखी प्रसन्नवदनतां
संप्रतिपन्नवदित्यर्थः॥ न वस्त्वेवं लोके दृष्टं किमायातमित्यत आह॥ देह्यादीति॥ लोष्टादौ सुखदे-
ह्यादिलिंगाभावात् दुःखसुखयोरुद्भवनमेव न संभवति अतस्तद्दुःखाभावोपि न निश्चेतुं शक्यत इत्यर्थः॥

सुखं दैन्यविकाराभ्यां परदुःखसुखोद्भवं॥ देह्याद्यभावतो लोष्टे दुःखाद्यूहो न संभवेत्॥३९
स्वकीये सुखदुःखे तु नोहनीये तत स्वयं॥ नावेद्येते नुभूत्यैव तदभावोपि नान्यतः॥४०॥

इदानीं परकीयसुखदुःखाभ्यां स्वकीयसुखदुःखयोर्वैषम्यं दर्शयति॥ स्वकीये इति॥ स्वनिष्ठयोः सुखदुःख-
योरुद्भवनमेव न संभवति अतस्तद्दुःखाभावोपि न निश्चेतुं शक्यत इत्यर्थः॥ इदानीं परकीयसुखदुःखा-
भ्यां स्वकीये तु न वसिद्धत्वात् नानुमेयत्वं यतस्तस्मात् स्वयोः सुखदुःखयोर्न विसंज्ञावोधया त्वनुभूत्यैवावस्य-
णाद्वगम्यते तथा तदभावोपि तयोः सुखदुःखयोरभावोपि नान्यतः अनुमानादेर्नावगम्यते किंतु प्रत्यक्षे- १२
णैवेत्यर्थः॥ ४०॥

फलितमाह॥ तथेति॥ तथा सति परकीयस्वकीययोः सुखदुःखयोरेवमनुभवगम्यत्वे सति स्वकीयसुखदुःखे अपि वि-
द्यमाने दुःखाभावो न तु सुखमेवं नैव सिद्धः॥ ततोपि किं तत्राह॥ विरोधातीति॥ सुखौ सुखविरोधिनो दुःखस्याभावात् निर्वि-
घ्नं वाधरहितं सुखमिष्यतामस्तु पैष्टमां॥४१॥ अन्यथा हि सुखसाधनसंपादनान्यथानुपपत्त्यापि सुखौ सुखम-
स्तीत्यवगम्यतस्तस्मात्॥ आह महदिति॥ तत्र तस्मात् सुखासुखं न भवेत् महत्तरप्रयासेन बहुवित्तव्ययशरीरपीड-

तथा मतिस्य सुखे चादुःखाभावो नु भूतितः॥ विरोधिदुःखराहित्यात्सुखं निर्विघ्नमिष्यतां॥४१॥ म-
हत्तरप्रयासेन मृद्वङ्गनाद्यादिसाधनं॥ कुतः संपाद्यते मुक्तौ सुखं चेत्तन्न नो भवेत्॥४२॥ दुःखनाशार्थ-
मेवैतदिति चेद्रोगिणस्तथा॥ न वस्तु रोगिणस्तेन सुखायेवेति निश्चितं॥४३॥

वादित्रामृदङ्गव्यादिकस्त्रीपुंमैथुनादिसाधनं सुखधनं कुतः कस्मात्कारणात्संपाद्यते न कुतोपीत्यर्थः॥४२॥
सुखार्थापत्तेरन्यथोपपत्तिं शंकते॥ दुःखेति॥ एतद्व्यादिसाधनसंपादनं दुःखनिवृत्तिफलकं न तु निरयत-
मिति परिहरति॥ रोगिण इति॥ रोगादिदुःखे सति तन्निवृत्तये तत्र वस्तुतदभावे तु दुःखाभावात्तत्संपाद-
नं सुखायैवेत्यवगम्यत इत्यर्थः॥४३॥

ननु सुषुप्तसुखस्य स्रग्व्यादि साधनजन्यत्वे आत्मस्वरूपत्वं कादुच्यते इति शंकते। तर्हीति। किं निद्रागमनात् पूर्वकालीनस्य विषयजन्यत्वमुच्यते। उत निद्राकालीनस्येति विकल्प्याद्यमंगीकरोति। भवत्वेवेति। द्वितीयं निराकरोति। निद्रायामिति सुषुप्तौ शय्याद्यनुसंधानाभावात् तज्जन्यत्वं तत्र सुखस्य नसंभवतीति भावः ननु निद्रायामजन्यं सुखं यद्यस्ति तर्हि तद्विषयसुखवत् कुतो नानुभूयत इति शंकायां तदनुभवितुस्तदानीम्

तर्हि साधनजन्यत्वात् सुखं वैषयिकं भवेत्। भवत्वेवात्र निद्रायाः पूर्वं त्वासीत् सनातनम्॥४१॥ निद्रायां तु सुखं यत् तज्जायते केन हेतुना। सुखात्मनि मुखधीरादौ पश्चात् लीनो सरेत् सुखे॥४२॥ जाग्रत्काहति निःश्रान्तो विश्रमार्थं विरोधिनि। अपनीते स्वस्थचित्तोऽनुभवेद् विषये सुखं॥४३॥ ॥

निर्ममत्वात् विषयसुखवत् तदनुभवरूपं निद्रायेत्याह। सुखेति। अत्रादौ निद्रायाः पूर्वस्मिन् काले जीवः सुखात्मनि सुखाभिमुखधीः शय्यादिजन्यसुखात्मिसुखबुद्धिः पश्चात् तयोः क्रमस्तया विषये भवति। पश्चात् निद्राकाले परे तत्र स्वसुखस्वरूप सुखे मज्जति लीनो भवेत् ४२ संक्षेपेणोक्तमर्थं लोकचेष्टया प्रपंचयति। जाग्रत्काहतिरित्यादिना जीवो जाग्रत्काहतिः निजगिरणा व्यापारविशेषैः श्रान्तो विश्रामस्त दत्ता १३

शय्यादौ शयनं कृत्वा। अनंतरं विरोधिनि व्यापारजनिते दुःखे अपनीते निवारिते सति स्वस्थचित्तोऽनाकुलमनाः तल्पशय्यादौ विषयेषु जायमानं सुखं अनुभवेत् सन्ताकुमति। विषयसुखं च कीदृशमित्याकांक्षायां तत्स्वरूपं दर्शयन् परं सुखे निमज्जननिमित्तत्वेन तदनुभवे प्रक्रमं दर्शयति। आत्मेति। अत्रानागते विषयसंपादनाद्विना दुःखमनुभूय तन्निवृत्तये शय्यादौ शयानस्य बुद्धिरंतर्मुखा भवति तस्यां च

आत्माभिमुखधीवृत्तौ स्वानंदः प्रतिबिंबति। अनुभूयैव तत्रापि त्रिपुट्यां शांतिमाप्नुयात्॥ ४४॥ तत्त्वं तु सुप्तापनुसर्वनिरोधाद्विसरात्मनि। तेनैकत्वं प्राप्य तत्र सो ब्रह्मानंदः स्वयं भवेत्॥ ४५॥

बुद्धिवृत्तौ स्वरूपभूतस्वानंदः स्वाभिमुखे दर्पणे मुखमिव प्रतिबिंबति एष हि विषयानंदः अयं चाप्यस्यामपि वेलायां एनं विषयानंदमनुभूयानुभवितृत्वानुभवत्वानुभाव्यत्वलक्षणायां त्रिपुट्यामप्यशांतिमाप्नुयात्॥ ४४॥ ततः किं तत्राह। ततश्चेति। तस्यां त्रिपुट्यां दत्तानिजनितश्रमस्योपशमोदय एव जीवः परमात्मन्यानंदरूपे ब्रह्मणि धावेत् शीघ्रं गच्छेत् गत्वा च तेन ब्रह्मणैकत्वं तादात्म्यं गत्वा सत्तासाम्यं तदा स पत्नीनवतीति श्रुतेः। स्वयमपि तत्स्वरूपस्सन् सुप्तोऽस्थितो ब्रह्मानंदो भवेत्॥ ४६॥ ॥

अस्मिन्नुपपादितेमोक्षसुखेब्रह्मानंदेनाकुलाद्यो बहवो दृष्टांताः अस्तुकाचिंतयं तस्मात् द्यंतइतिशाकु
निःपंचाप्तिदृष्टांतैः सुखानंदोपपादनेन नत्रसुखं नास्तीति मतं निराकरोकृतं॥४८॥ तत्तुवक्ष्य
शाकुनिःसूत्रेण प्रबद्धोदिशंदिशंपतित्वाऽन्यत्रायतनमलब्ध्वाबंधनमेवोपाश्रयतेएवमेवखलु
सोम्यतन्मनोदिशंदिशंपतित्वाऽन्यत्रायतनमलब्ध्वाप्राणमेवोपाश्रयतेप्राणबंधनंहिसोम्यमनइत्य
स्यदृष्टांतदार्ष्टांतिकप्रतिपादनपरस्यवाक्यस्यप्रकृतिवाक्यसार्थमंत्रेपपदत्रयंचितिशौकद्येनाशाकु

दृष्टांताःशाकुनिःश्येनःकुमारश्चमहान्नृपः॥महाब्राह्मणइत्येतेसुखानंदेऽत्रकीर्तिताः॥४९॥
शाकुनिःसूत्रबद्धःसन्दिक्षुव्याप्यविश्रमं॥अलब्ध्वाबंधनंस्थानंहस्तस्तंनाद्यपाश्रयेत्॥५०॥

नितिहस्तादौकविदाधारेसूत्रेणबद्धःशाकुनिःपक्षीआहारादिग्रहणायदिक्षुप्राच्यादिषुव्यापारंकृत्वात
त्रविश्रमंविश्रम्यतेमिवृत्तिर्विश्रमःआधारःतमलब्ध्वालब्ध्वाबंधनस्थानंहस्तादिकमेवयथाश्रयेतत
थाजीवोपाधिभूतंमनोदिक्षुप्राणपुण्यफलयोःसुखदुःखयोरनुभवायसंचारंगत्वातत्रस्वोत्ता
मस्वदेकमीप्राणिहीणमतिस्वोपादानेऽज्ञानेविलीयतेतत्तदुपचेतनदुपहिताजीवःपरमात्मेवभवतीत्यर्थः॥ १५

५८

५१॥इदानींश्येनदृष्टांतप्रपंचनपरंमन्त्रंपाठयतिश्येनोवासुपर्णोवाविपरिपत्यश्रांतःसंह
त्यपक्षौसंलयायैवधार्यतएवमेवायंपुरुषएतस्माअन्तायधावतियत्रसुप्तोनकंचनकामंकामयतेनक
ंचनस्वप्नंपश्यतीत्यस्यबृहदारण्यकवाक्यस्यार्थंसंक्षिप्याह॥श्येनइति॥यथाश्येनःसर्वतःप्रचरन्
श्येनएवतन्नामापक्षीगगनसंचारनिमित्तश्रमपरिहारायवेगेनशयितुंशयनंकुर्तुंनीडैकलंपटःकु

जीवोपाधिर्मनस्त्कर्माधर्मफलाशये॥स्वप्नेजाग्रतिचश्रांतोलीनोकर्मणिलीयते॥५२॥श्ये
नोवेगेननीडैकलंपटःशयितुंव्रजेत॥जीवःसुप्तेतथाधावेद्ब्रह्मानंदैकलंपटः॥५३॥अतिबा
लस्तनपीबालःसमुद्भवायागतोहसन्॥रागद्वेषाद्युत्पत्तेरानंदैकस्वभावनात॥५४॥ ॥

लायैकाभिलाषवान्व्रजेत्शीघ्रंगच्छेत्तद्वदेवजीवोमनउपाधिकर्मविदागसोपिब्रह्मानंदैकाभिलाषवा
नस्वापायशीघ्रंगच्छेत्तद्दयाकरणमितिशेषः५० सयथाकुमारोवामहाराजोवामहाब्राह्मणोवाऽति
घ्नीमानंदस्यगत्वाशयीतैवमेवैषएतच्छेतइतिकुमारादिदृष्टांतत्रयप्रदर्शनपरंवाक्यंविवरणंगतवा
क्यसौकत्रयेणव्याचष्टेअतिबालेति॥यथास्तनंधयःशिशुःस्थागत्वास्तनंपाययितास्त्र्यादिषुयोषि
नितल्पेशायितःसर्किंचादिनानस्पृश्यतेनरागादिरहितःसन्सुखस्वरूपनिरवाचतिष्ठते॥५५॥ ॥

ब्रह्मा यथावासार्वभौमोरम्मा विशदबुद्धित्वे पिसर्वैर्मनुष्यानंदैर्युक्तत्वात्सर्वाधनीयानां देनरागादिरहितश्चानंदस्व
त्रिरेवावतिष्ठते ॥४५॥ यथावामहाविप्रो महाब्राह्मणः प्रत्यगभिन्नब्रह्मसाक्षात्कारवानहं कृतकृत्य इत्येवंरू
पांविद्यानंदस्य परमांसीमांजीवन्मुक्तत्वावस्थापन्नः परमानंदस्वरूप एवतिष्ठति ॥ तथा सुषुप्तोप्यानंदरूपत्वि
युनीतिशेषः ४२ नन्वेते कुमारादयस्त्रय एव किमिति दृष्टांतीकृता नान्य इत्याशंक्य दृष्टांतत्रयोदाहरणप्र

महाराजः सार्वभौमः संपन्नः सर्वभोगतः ॥ मानुषानंदमीमांसाप्राप्तानंदैकमूर्धनिकः ॥
४३॥ महाविप्रो ब्रह्मवेदी कृतकृत्यत्वलक्षणं ॥ विद्यानंदस्य परमां काष्ठां प्राप्यावतिष्ठते ॥४४॥
मुग्धबुधातिबुधानां लोके सिद्धा सुखात्मना ॥ उदाहृता नान्यस्तु दुःखिनो न सुखात्मकाः ॥४५॥

तात्पर्यमाह मुग्धेति ॥ विवेकशून्यानां मध्ये अतिबालः सुखी विवेकीषु सार्वभौमः अतिविवेकिष्वानंदस
न्मसाक्षात्कारवानेवेत्यर्थ तदेतु सर्वदारागादिमत्वादसुखिनः इति श्रुतिषु नं दृष्टांतिकृता इत्यर्थः ॥४५॥ न
न्वेते सुखिनः अस्तु तेकिमायातमिस्माकं प्रकृत दार्ष्टांतिकश्रुतिवाक्यसतात्पर्यमाह कुमारादीति ॥ कुमारा २५
दिवत्कुमारादयो यथानंदभाजः एवमयमपिसुषुप्तः ब्रह्मानंदैक

तत्परः ब्रह्मानंदैकमित्यर्थः ॥ ब्रह्मानंदैकपरत्वे युक्तिं प्रदर्शन परं तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न
बाह्यं किंचनवेदनांतरमेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचनवेदनांतरमिति श्रौ
तिब्राह्मणगतवाक्यमर्थतोनुक्रामति ॥ स्त्रीपरिष्वक्तेति ॥ यथा लोके प्रियया स्त्रिया आलिंगितः कामी बा
ह्यमंतरविषयज्ञानशून्यता सुखमूर्तिर्निर्विकल्पवति ॥ तथा सुषुप्तो प्राज्ञेन परमात्मनैकं गतो जीवो बाह्या

कुमारादिवदेवायं ब्रह्मानंदैकतत्परः ॥ स्त्रीपरिष्वक्तवद्वेद न बाह्यं नापि चांतरं ॥४६॥ बा
ह्यं रथ्यादिकं वृत्तं गृहकृत्यं यथांतरं ॥ तथा जागरणं बाह्यं नाडीस्थः स्वप्न आंतरः ॥४७॥
पितापि सुप्तावपितेत्यादौ जीवत्वकारणात् ॥ सुप्तो ब्रह्मैव नो जीवः संसारित्वासमीक्षणात् ॥
इविषयज्ञानाच्चावादानंदरूप एव भवति ॥४५॥ अत्र दृष्टांतदार्ष्टांतिकवाक्ययोर्बाह्याभ्यंतरशब्दयोर्विव
क्षितमर्थं क्रमेण दर्शयति ॥ बाह्यमिति ॥ हृदंतदेवांतनाडीभ्यः जाग्रद्वासनायां नाडीमध्ये प्रतीयमानः प्रपंच
स्वप्न इत्युक्तं ॥४६॥ जीवसुप्तो ब्रह्मानंदरूपेणावतिष्ठत इत्यत्र युक्तिप्रदर्शनपरायाः अत्र पितापिता भवतीत्या
दिकायाः श्रुतेस्तात्पर्यमाह ॥ पितेति ॥ अत्र सुप्तावस्थायां पितृत्वादिजीवधर्माणां अवसेवनिवारितत्वाज्जीव
त्वाभावात्सुप्तो ब्रह्मैवेति निश्चीयत इत्यर्थः ॥४७॥

ननु पितृत्वाद्यभिमानाभावेपि सुखित्वादिसंसारः किं न स्यादित्याशंक्य संसारस्य देहाभिमानमूलत्वात्तदभावे
ऽनावृत्तिमत्वान स्यादिति पादकं तीर्णो हि तदा सर्वाञ्छोकान् हृदयस्य भवतीति समनन्तरवाक्यं तात्पर्यतो व्या
चष्टे । पितृत्वादीति ॥५७॥ ननु हृदात्मनाग्निः श्रुतिभिर्न सुखं प्राप्ति सुखतोऽभिधीयमानोपलभ्यत इत्याशंक्य तत्रा
भिधानपरं केवलश्रुतिवाक्यमर्थयति । पठति । सुषुप्तीति । सकलेन्द्रियसादिलक्षणे प्रपंचे विलीने सोपादानप्र

पितृत्वाद्यभिमानो यः सुखदुःखाकरः स हि ॥ तस्मिन्नपगते तीर्णः सर्वान् शोकान्भवत्ययं ॥५७॥
सुषुप्तिकाले सकले विलीने तमसावृते ॥ सुखरूपमुपैतीति ब्रूते ह्याथर्वणी श्रुतिः ॥ सुखमस्वा
प्समत्राहं नैव किंचिदवेदिषं ॥ इति त्वेतु सुखाज्ञाने परामृशति चोत्थितः ॥५९॥ ॥

तायां तमःप्रधानभूतायां प्रकृतौ विलयं गते सति तन्मयतया प्रकृत्यावृत्तत्वाच्छादिति जीवः सुखरूपं ब्र
ह्मोपैतीति तस्याः श्रुतेरर्थः ॥५८॥ न केवलमयं श्रुतिसिद्धोर्थः किंतु अनुभवसिद्धोपीत्याह । सुखमिति ॥
सुषुप्तादुत्थितः पुरुषः एतावंतं कालं सुखमस्वाप्सं न किंचिदवेदिषमित्येव निद्राकालीने सुखाज्ञाने परा
मृशतीति स्मरति । अतोपि सुप्तौ सुखमज्ञानं च सवगम्यते ॥५९॥ ॥ १९

ननु परामर्शस्य स्मृत्याः प्रमाणत्वात्कथं तद्बलात् सुखसिद्धिरित्याशंक्य तस्याप्रामाण्येपि तन्मूलभूतानुभ
वबलात्तत्सिद्धिरित्यभिप्रायेणाह । परामर्श इति । परामर्शः स्मरणं ज्ञानमनुभूत एव विषये भवतीति
नानुभूतविषय इति तस्माद्धेतोस्तदा सुप्तौ अनुभवश्चासीदित्यवगम्यते । ननु सुप्तौ मनःप्रभृतीनां
ज्ञानकरणानां विलीनत्वात्कथमयमनुभवसिद्धिरित्याशंक्य किं सुखानुभवसाधनं नास्तीत्युच्यते अज्ञाना

परामर्शोऽनुभूतेऽस्मिन्नासीदनुभवस्तदा ॥ चिदात्मत्वात्स्वतो भाति सुखमज्ञानधीस्ततः ॥६०॥
ब्रह्मविज्ञानमानंदमिति वाजसनेयिनः ॥ पठंत्यतः स्वप्रकाशं सुखं ब्रह्मैव नेतरत् ॥६१॥

नुभवसाधनं वा नाद्यः स्वप्रकाशचिद्रूपत्वेन सुखस्य करणानपेक्षत्वात् न द्वितीयः । स्वप्रकाशसुख
बलादेव तदावरकाज्ञानप्रतीतिसिद्धेरित्यभिप्रेत्याह । चिदात्मेति ॥ ततः स्वप्रकाशसुखाद् ज्ञानधीर
ज्ञानस्य प्रतीतिर्भवतीति ॥६०॥ ननु सौषुप्तसुखस्य स्वप्रकाशसुखत्वेपि ब्रह्मानंदः स्वयं न वेदितव्य
इत्युक्तं ब्रह्मस्वरूपत्वं न संभवति मानाभावादित्याशंक्य विज्ञानमानंदमित्यादि बृहदारण्यकवाक्यस
द्भावान्मैवमित्याह । ब्रह्मविज्ञानमिति ॥६१॥ ॥

नन्वनुभवस्मरणयोरेकाधिकरणत्वनियमात्सुखमहमस्वाप्सं न किंचिदवेदिषमिति च सौषुप्त
सुखाज्ञानयोर्विज्ञानमयशब्दवाच्येन जीवेन स्मर्यमाणत्वात्तस्यैव सुखाद्यनुभवेऽत्र स्वीकर्तव्ये इत्याशंक्या
तदुपाधेर्विज्ञानस्याज्ञानकार्यस्याज्ञाने विलीनतां मैव मिस्यनिप्रायेणाह ॥ यदज्ञानमिति ॥ न किंचि
दवेदिषमिति स्मरणान्यथानुपपत्त्या गम्यमानं यदज्ञानमस्ति तत्र तस्मिन्नज्ञाने तौ प्रमातृत्वेन प्रसिद्धौ
विज्ञानमनोमयौ लीनौ विज्ञानत्वाद्याकारं परित्यज्य कारणरूपेणावस्थितौ अत तदुपाधिकस्य न

यदज्ञानं तत्र लीनौ तौ विज्ञानमनोमयौ ॥ तयो
र्हि विलयावस्था निद्राज्ञानं च सैव हि ॥६२॥

तत्र विद्यमानत्वमिति भावः ॥ तत्रोपपत्तिमाह ॥ तयोरिति ॥ हि यस्मात्तयोर्विज्ञानमनोमययोर्विलयावस्था नि
द्रा सुप्तौ विज्ञानविरतिः सुप्तिरित्यभिधानात् ॥ तर्हि निद्रायामेव विलीना वृत्तिर्वक्तव्येत्याशंक्या
ह ॥ जाग्रत्स्वप्ने निमित्ते सैव निद्राविक्षिप्तज्ञानमिति च व्यवह्रियत इत्यर्थः ॥६२॥ ननु तर्हि सौषुप्तसुखा
नुभवकाले मनोविज्ञानमयस्य प्रबोधे कथं तत्स्मर्तृत्वमित्याशंक्य विलयावस्थायामपि तत्स्वरूपना १७

शाभावाद्विलयावस्थोपाधिमदानंदमयरूपेणानुभवितृत्वं विज्ञानाद्यवस्थघनीभावोपाधिमत्त्वेन
स्मर्तृत्वं चैकस्य घटत इत्यभिप्रायेणाह ॥ विलीनेति ॥ यथाग्निसंयोगादिना विलीनं घृतं पश्चाच्छायादि
संबंधवशात् घनीभवति एवं जाग्रदादिषु भोगप्रदस्य कर्मणः क्षयवशान्निद्रारूपेण विलीनमन्तःकरणं
पुनर्भोगप्रदकर्मवशात्प्रबोधे विज्ञानाकारेण घनीभवति अतस्तदुपाधिक आत्मापि विज्ञानमयो घ

विलीनघृतवत्पश्चात्स्याद्विज्ञानमयो घनः ॥ विलीनावस्थ आनंदमयशब्देन कथ्यते ॥
६३॥ सुप्तिपूर्वक्षणे बुद्धिवृत्तिर्या सुखबिंबिता ॥ सैव तद्बिंबसहिता लीनानंदमयस्ततः ॥
६४॥

नः स्यात् एव पूर्वं विलयावस्थोपाधिकः सन्नानंदमय उच्यते ॥६३॥ विलीनावस्थ आनंदमय इ
त्युक्तमेवार्थं स्पष्टीकरोति ॥ सुप्तीति ॥ सुप्तेः पूर्वस्मिन्नव्यवहिते क्षणे यांतर्मुखा बुद्धिवृत्तिः स्वरूपानंदस्य
सुखप्रतिबिंबयुक्ता भवति ततः अनंतरं तत्प्रतिबिंबसहितासैव बुद्धिवृत्तिर्निद्रारूपेण विलीनाऽऽ
नंदमय इत्यभिधीयते ॥६४॥

एवमानंदमयस्वरूपं प्रदर्श्य तस्यैव प्रबोधकाले विज्ञानमयरूपेणावस्थितेः सिद्धये तदानीं सुखानुभवं उपपादयति। अंतर्मुखेति। सुखप्रतिबिंबसहितांतर्मुखधीवृत्तिजनितसंस्कारसहिताज्ञानोपाधिकोयमानंदमयः सदा सुषुप्तौ ब्रह्मसुखं स्वरूपभूतं स्वं चिदाभाससहिताभिरज्ञानोत्पन्नाभिः सुखादिगोचराभिर्वृत्तिभिः सर्वपरिणामविशेषैर्भुंक्ते अनुभवति॥६३॥ ननु तर्हि जागरण इव तदानीं सुखम्

अंतर्मुखो य आनंदमयो ब्रह्मसुखं तदा॥ भुंक्ते चिद्बिंबयुक्ताभिरज्ञानोत्पन्नवृत्तिभिः॥६३॥
अज्ञानवृत्तयः सूक्ष्मा विस्पष्टा बुद्धिवृत्तयः॥ इति वेदांतसिद्धांतपारगाः प्रवदंति हि॥६४॥ मांडूक्यतापनीयादिश्रुतिष्वेतदतिस्फुटं॥ आनंदमयभोक्तृत्वं ब्रह्मानंदे च भोग्यतां॥६५॥ ॥

इमवाभीसन्निमानः कुतो नस्यादित्याशंक्याविद्यावृत्तीनां बुद्धिवृत्तिवत्स्पष्टत्वाभावान्नानुभवस्याभिव्याये णाह। अज्ञानवृत्तय इति। इदं कुतोऽवगतमित्यत आह। इतीति॥६४॥ नन्वानंदमयो ब्रह्मानंदस्यानिरवद्यानुभवी भुंक्त इत्यत्र किं प्रमाणमित्यत आह। मांडूक्येति। एतच्छ्रुत्यर्थमेवाह। आनंदेति॥६५॥ १८



इदानीं सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानंदमयो ह्यानंदभुक् चेतोमुख इति मांडूक्यश्रुतिगतं वाक्यमर्थतः पठति एकीभूत इति। सुषुप्तं सुषुप्तिस्तत्र तिष्ठतीति सुषुप्तस्थः सुप्ताभिमानीत्यर्थः। आनंदमय आनंदप्रचुर आनंदभुक् स्वरूपभूतमानंदं भुंक्ते इत्यानंदभुक् चेतोमयवृत्तिभिश्चेतश्चैतन्यं तन्मयास्तत्प्रचुरा प्रतिबिंबसहिता इत्यर्थः। तास्ताः स्वयं भुंक्ते चेतोमय इत्यत्र यस्मान्निरानंदभुगिति

एकीभूतः सुषुप्तस्थः प्रज्ञानघनतां गतः॥ आनंदमय आनंदभुक् चेतोमयवृत्तिभिः॥६६॥ विज्ञानमयमुख्यैर्यो रूपैर्युक्तः पुराधुना॥ स लयेनैकतां प्राप्तो बहुतंडुलपिष्टवत्॥६७॥

योजना॥ एकीभूतस्यैकीभूत इति पदस्यार्थमाह। विज्ञानेति। यस्मात्पुरा जागरणस्वप्नयोर्विज्ञानमयमुख्यैः स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमय इत्यादिश्रुत्युक्तै रूपैराकारविशेषैर्युक्तः स एवाधुना विज्ञानमयत्वाद्युपाधिलयेनैकतां एकाकारतां प्राप्तो गतो भवति तत्र दृष्टांतमाह बह्विति। बहुतंडुलजनितपिष्टवदित्यर्थः॥६७॥ ॥

अथ प्रज्ञानघनत्वाद्यर्थमाह ॥ प्रज्ञानानीति ॥ पुरा पूर्वं जाग्रदादौ प्रज्ञानत्वाद्बाह्यघटादिगोचरतया वुद्धि
वृत्तयो ऽभवन् ॥ अथ सुषुप्तिकाले घटादिविषयाभावेसति घनो ऽभवत् ॥ चिद्रूपेणैकरूपोभूत् ॥ तत्र दृष्टां
तमाह ॥ घनत्वमिति ॥ इदानीं प्रज्ञानघनत्वाद्यर्थं निरूप्य प्रसंगाद्योगं तं किंचिदाह ॥ चिद्घनत्व
मिति ॥ यदि दृष्टांतप्रमाहितेनाभिधीयमानं प्रज्ञानघनत्वमभिप्रेतं तदैव लौकिकाः शास्त्रसंस्काररहि
ताः ताकिंकावैशेषिकादयः शास्त्रिणश्च दुःखाभावं प्रकल्पयंते दुःखाभाव इत्याहुः ॥ कुत इत्यत आह ॥

प्रज्ञाना त्रिपुरा बुद्धिवृत्तयो यद्घनो ऽभवत् ॥ घनत्वं हिमबिंदूनामुदग्देशीय यातथा ॥ ११ ॥ चि
द्घनत्वं साक्षि नावं दुःखाभावं प्रकल्पते ॥ लौकिकास्ताकिंकाद्या यावत् दुःखइति विलोपनात् ॥ १२ ॥
अज्ञानविंबिता चित्स्यात् मुखमानंदभोजने ॥

यावद्दुःखेति ॥ यावतो दुःखस्त्रयस्तासां सर्वासां विलयादित्यर्थः ॥ १२ ॥ पूर्वेदितत्त्वाः श्रुतिवाक्यगतचे
तोमुखत्वाद्यर्थमाह ॥ अज्ञानेति ॥ आनंदभोजने सौषुप्तब्रह्मानंदास्वादने मुखं साधनं अज्ञानविंविता ब्रह्मा
चित्सा तस्मात्प्राज्ञ इत्यज्ञानप्रतिविंबितं चैतन्यमेव भवेत् ॥ ननु सुषुप्तावानंदमयेन रूपेण जीवेन ब्रह्मसुखं १९
चेद्भुज्यते तर्हि तत्परित्यज्य बहिः कुतो जागरणे दुःखालयमागच्छेदित्यत आह ॥

भुक्त्वेति ॥ पुण्यपापकर्मफलभोगार्थ प्रेरितो जीवः सान्निध्यात् कृतमपि ब्रह्मानंदं परित्यज्य बहिर्या
ति जागरणादिकं गच्छतीत्यर्थः ॥ १३ ॥ एतत्कुतो ऽवगम्यत इत्याशंक्य पुनश्च जन्मान्तरकर्मयोगात्स एव जी
वः स्वपिति प्रबुद्ध्यतीति कैवल्यश्रुतिवाक्यादिति मन्वानस्तद्वाक्यमर्थतः पठंस्तदभिप्रायमाह ॥ कर्मेति
॥ ११ ॥ सुषुप्तो ब्रह्मानंदो ऽनुभूत इत्यत्र लिंगं चाह ॥ किंचिदिति ॥ प्रबुद्धस्य जागरणे शत्रस्यापि किंचित्काल

भुक्तं ब्रह्मसुखं स्पष्टं वहिर्यात्प्रियकर्मणा ॥ १३ ॥ कर्मजन्मांतरे ऽनूदुयोगात्प्रबुध्यते पुनः ॥
इति कैवल्यशाखायां कर्मजो बोध ईरितः ॥ १४ ॥ किंचित्कालं प्रबुद्धस्य ब्रह्मानंदस्य वासना ॥
अनुगच्छेद्यतस्तस्मात्तूष्णीं निर्विषयः सुखी ॥ १५ ॥ कर्मनिर्धरितः पश्चात्नानादुःखानि नावय
तोभ्यानैर्विस्मरति ब्रह्मानंदमेषोखिलो जनः ॥ १६ ॥ स्वल्पकालपर्यंतं सुषुप्त्यावनुभूतस्य ब्रह्मा
नंदस्य वासनासंस्कारो ऽनुगच्छेदनुगच्छति ॥ कुत एतदवगम्यत इत्यत आह ॥ यत इति ॥ यतः कारणा
त्प्रबोधादौ निर्विषयविषयानुभवरहितोपि सुखी तूष्णीं भावेन वगम्यत इत्यर्थः ॥ १५ ॥ तर्हि तथैव
सर्वदा कुतो न वर्तिष्ठत इत्यत आह ॥ कर्मनिरिति कर्मभिः पूर्वोक्तैः प्रोच्चरितः सर्वोपि प्राणी पश्चान्ना
नाविधानि दुःखानि अनुसंधानः शनैः ब्रह्मानंदं विस्मरति ॥ १६ ॥ ॥

पंचद॰
२१
ततोपि ब्रह्मानंदेन विश्रांतिपत्रिः कार्येत्याह॥ प्रागूर्ध्वेति॥ प्रहरं मनुष्याणां निद्रायाः प्रागूर्ध्वमपि नि
द्रारंभे निद्रावसाने च ब्रह्मानंदस्यैव होस्तियतो निद्रादौ मृदुत्वाभ्यासिसंपादयेत् तदवसाने च तं पी
सकृमसकास्तृष्णीमासते तेन कारणेन अभ्यास्तानंदेको बुद्धिमान्विवदेत न को पीत्यर्थः॥७७॥ तोदय
तिनेत्येति॥ गुरुशुश्रूषादिलस्य ब्रह्मानेदानुवृत्त्यस्त्वहं तस्मीत्येति मात्रलम्य वेगुरुशुश्रूषादिपरस्य
प्रागुर्ध्वमपि निद्रायाः पक्षपातो दिने दिने। ब्रह्मानंदे नृणां तेनः प्रतोस्मि न्विवदेत कः॥७७॥ न
नु तूष्णींस्थितौ ब्रह्मानंदश्चेदभाति लौकिकाः। अलसप्रमुखतायस्मिंस्तत्तत्रैगुरुणा न वा किं॥७८
बाढं यथ्वो सेतिविद्धुःश्वेत्कृतार्थस्तावतैव ते॥ गुरुत्वयस्त्रैविनात्मितं गंनीरं ब्रह्मवेत्तिकः॥७९॥
जानामहं त्वदुक्त्याद्य कुतो मेन कृतार्थता। अत्रोच्यते त्वदीयोक्त्या जानन्नस्य कस्य चित्॥८०॥
श्रवणादिकं वृथाप्रासादित्यर्थः॥७८॥ स्वयं ब्रह्मानंदं तत्वज्ञाने मति कृतार्थता न वसे वत देवगुरुशुश्रू
षादिकं मतस्तेनासं ननवनीत्याह॥ बाढमिति अलसत्वगंनीरं दुरवगाहम बाङ्मनसगम्य सर्वांगसंसर्वेति
रसत्वसिद्धरूपब्रह्मागुरुत्वाख्येविहायान्येन केनाप्युपायेन को जानीयान्न कोपीत्यर्थः॥७७॥ ननुत
न साकयादेव ब्रह्मा
२०
ब्रह्मानंदं जानतोपि ममनकृतार्थतोपलभ्यत इत्याशंक्यानुवादपूर्वकं सोपहाससमुत्तरमाह॥ जानामी
ति॥८०॥ तमेव हृष्टांतं दर्शयति॥ चतुर्वेदेति॥ कश्चित्तु चतुर्वेदविदे कस्मै चिद्दिं वक्रुपनं दातव्यमिति॥
वं विधवान्संध्यकत्वा वेदाश्चत्वार इत्यस्मादेव वाक्यादहं वेद्मि अतो मदीयतामिति वक्तिं तद्वज्ञानपी
त्यर्थः॥८०॥ ननु वेदाश्चत्वार इति यो वेदस्य वेदगतां संख्यामेव वेत्ति न तु वेदानां स्वरूपमिति चोदय
चतुर्वेदविदे देयमिति श्रुत्वेवनवेत्तितः। वेदाश्चत्वार इत्येवं वेद्मि मे दीयतां धनं॥८१॥ संख्यामे
वैष जानाति न तु वेदानशेषतः। यदि तर्हि समप्येकं नाशेषं ब्रह्म वेत्सि हि॥८२॥ अखंडैकरसा
नंदे मायामात्र्यकार्यवर्जिते। अशेषत्व सशेषत्व वाक्यावसर एव कः॥८३॥
तिश्वसंख्यामिति॥ साम्येन समाधत्ते॥ तर्हीति॥ एवं चतुर्वेदान्निराम न्य इव त्वमप्यशेषं संपूर्णं यथा न व
त्तियावस्तनवेत्सि नैवजानासि॥८२॥ ननु संख्यातिरिक्तवेदस्वरूपस्येदं त्वस्तगतादिनेद ब्रह्म
स्वानंदरूपे ब्रह्मणि अज्ञातमनसंचारस्याभावादसंपूर्णज्ञानितोपालंभोनघटत इति चोदयति
अखंडैकेति॥८३॥

पंचद॰
२१

ब्रह्मज्ञाने प्रवृत्तोऽपत्यादिकं दर्शयितुं ब्रह्मज्ञानामिशतिवदं तं विकल्पयन्ति । शास्त्राणीति । किम स्वेदं करस मम द्वितीयं मच्चिदानंदरूपमिमादिशास्त्राणेव पठसि अहोस्विद्यत तेषां शास्त्राणामर्थं च ग तादिनं दृष्टत्वादिकं च पश्यसि ज्ञानासीति विकल्पार्थः । आद्येद्य पक्षे मा वृत्तोऽत्वं दर्शयति शाद पाठेऽस्ति ॥८४॥ द्वितीये यितद्दर्शयति अर्थेऽति । व्याकरणादिस्कंधलक्षणे निगमादौ व्याकरणस्येव परोक्षज्ञानसंपादितेऽपि मंत्रपाठादिनिरासेना परोक्षीकरणमवशिष्यते । तर्हिकिंदाम पूर्णत्वं ज्ञान

शास्त्राणि व पठत्याहो तेषामर्थं च पश्यति । शास्त्रपाठेऽर्थबोधे च संपाद्यत्वेन शिष्यते ॥ व्यास्त्र
र्थे व्याकरणबुद्धे मत्वात्कारोऽवशिष्यते । स्यात्कृतार्थत्वधीर्यावत्तावद्गुरुमुपास्व तोः ॥८५॥
आस्तामेतद्यत्र यत्र सुखं स्याद्विषयैर्विना । तत्र सर्वत्र विज्ञेया ब्रह्मानंदस्य वासना ॥८६॥

सेत्याशंक्य तदवधिं दर्शयति ॥ स्यादिति । यदा कृतार्थत्वबुद्धिरुत्पद्यते तदा ज्ञानस्य संपूर्णताऽव गंतव्येत्यर्थः ॥८५॥ एवं प्रासंगिकं परिसमाप्य प्रकृतमेवानुसरति आस्तामिति । यत्र यत्र यस्मिन्नुका लेऽस्मिंत्वा वा देशे विषयानुभवमंतरेण सुखं न वति तत्र तत्र सुखस्य विषयजन्यत्वाभावात्तामान्नाहं ब्रह्मा॰ २१
कारावृततत्त्वाच्च वासनानंदत्वमवगंतव्यमित्यर्थः ॥८६॥ ॥

एवं ब्रह्मानंदवासनानंदौ दर्शयित्वा इदानीं आनंदत्रैविध्यनियमनाय मानसिसुखधीरूपत्वात्विषयत्वो कं मेवविषयानंदं पुनरनुवदति । विषयेष्वपीति । यदा यदा स्रगादिविषयलाभानंतरं तदिच्छोपरमे न वर्तितदा तदा मनसंतर्मुखे सति तस्मिन्मनःस्यात्मानंदः प्रतिबिंबितो भवत्ययं विषयानंद इत्यर्थः ८७॥ फलितमाह । ब्रह्मानंद इति । उक्तप्रकारेण स्वप्रकाशत्वेनात्मसुषुप्तौ प्रतिवासमानो योऽद्वयानंदो

विषयेष्वपि लब्धेषु तदिच्छोपरमे सति । अंतर्मुखमनोवृत्तावानंदः प्रतिबिंबति ॥८७॥
ब्रह्मानंदो वासना च प्रतिबिंब इति त्रयम् । अंतरेण जगत्यस्मिन्नानंदो नास्ति कश्चन ॥८८॥

यश्च तूष्णींस्थितौ विषयानुभवमंतरेण प्रतीयमानो वासनानंदो योऽप्यभीष्टविषयलाभानंतरं तदंतर्मुखे मनसि प्रतिबिंबितो विषयानंद एतत्त्रितयातिरेकेणास्मिन्जगति न कश्चिदानंदोऽस्ति । तत्रानंद त्रैविध्ये ब्रह्मानंदो विद्यासु प्रांतया । विषयानंदस्त्वनेन प्रकारेणानंदत्रैविध्यमुक्तं इदानीं तु ब्रह्मानंदो वासनाच प्रतिबिंब इति त्रयं तदिदं लक्षणमानंदस्य त्रैविध्यमुच्यते । अतः पूर्वोत्त रविरोधः किंच यावद्यावदहंकारो विस्मृतो भासमयो गतः । तावत्तावत्सूक्ष्मदृष्टेर्निजानंदोऽनुमी

प यतेश्चलितादृक्प्रमानुदासीनकालेप्यानंदवासनांउपेक्ष्यसुखमानंदेनावसेयं तस्मरश्चितो
क्तोप्रकारद्वयातिरिक्तो निजानंदमुख्यानंदावभिधीयेते॥ तथा द्वितीयाध्याये मंदप्रज्ञेनुजिघृ
क्षुमन्यानंदेन बोधयेदिति॥ आत्मानंद इत्येतन्नामाभिधीयते॥ योगानंदः पुरस्कृत्य योगानंदोपि
कस्मिंश्चन्नामनेति ब्रह्मानंदाभिधेयं ये तृतीयाध्याये ईरितः॥ अद्वैतानंद एवस्माद्विद्याद्वैतानंद
चाववमगलामः॥ अतः चंतरेण जगत्स्मिन्नानंदेनाभिकथ्यते मुक्तिविधिध्येतिचेन्मैवं॥ विद्या
नंदस्य विषयानंदवद्वृत्तः करणवृत्तिविशेषत्वेन विषयानंदेत्वांतर्भावि स विषयानंदस्य विद्यानंदाधी
नत्वे निरूपकग्रंथस्य त्रधा वृत्तिरूपत्वाभिधाने विवक्षितत्वात् निजानंदमुख्यानंदात्मानंदयोगानं
दाऽद्वैतानंदानां तु ब्रह्मानंदादनतिरिक्तत्वाद्वनयाति॥ यावद्यावदहंकारस्फुरत्यर्ते लोके योग
ब्रह्मणोपायभूतया योगानंदत्वेन विवक्षितस्य निजानंदस्यैव॥ न द्वैतं नाम तेनापि निद्रातं
चास्ति यत्सुखमब्रह्मानंदस्याहतमवयवमर्जुन इति॥ इत्यस्मिन्नुत्तरश्लोके एव ब्रह्मानंदत्वा ब्रह्मा
भिधानात् निजानंदो ब्रह्मानंदान्नाभिद्यते तथा मुख्यानंदोपि ब्रह्मानंद एव॥ तथा च विषया २२
नंदो वासनानंद इत्यपि॥

आनंदो जनयत्यास्य ब्रह्मानंदः स्वयंप्रभः इत्यत्र जन्यत्वेनामुख्यत्वेनयोर्विषयानंदवासनानंदयोर्ज
नकत्वेनाभिहितस्य ब्रह्मानंदस्यैव ताटकुप्रमानुदासीनकालेपीत्युत्तरत्र श्लोके आनंदवासना मु
पेक्ष्यमानंदेनावसेयस्यैव तस्मरश्चित्सुखानंदत्वाभिधानादात्मानंदाद्वैतानंदयोः ब्रह्मानंदत्वं योगा
नंदः पुरोक्तो यः स आत्मानंद इष्यतामिति तृतीयाध्यायादौ प्रथमाध्याये योगानंदतया विवक्षितस्य ब्र
ह्मानंदस्यैव योगानंदशब्देनानुवादपूर्वकं आत्मानंदत्वमभिधाय कथं ब्रह्मत्वमेतस्य सद्वयस्ये
ति चेदिति प्रश्नपूर्वकमाकाशादिशरीरांतमित्यादिना॥ द्वितीयस्य ब्रह्मत्वप्रतिपादनाद्वयानंदं
॥ तस्माद्ब्रह्मानंदो वासनानंदप्रतिबिंबरूपकं चैविध्यं मुख्यं॥ ननु तर्हि एवं वासनानंदात् ब्रह्मा
नंदः पीतरं॥ विद्वि योगी निजानंद इत्यत्र निजानंदस्य ब्रह्मानंदवासनानंदयोः भेदेन निर्देशोऽभि
न इत्युक्तमिति॥ न शंकनीयं एकस्यैव ब्रह्मानंदस्य जगत्कारणत्वोपाधिमाहित्यराहित्याभ्यां भेदेन भेद
व्यपदेशोपपत्तेः॥ तथाहि ब्रह्मानंदनिरूपणावसरे आनंदादेव भूतानि जातानीत्यादिना
जगत्कारणत्वाभिधानेन ब्रह्मानंदस्य मायात्वमवगम्यते निजानंदस्य जगत्कारणत्वानुपपत्तेः॥

आनंदं निरूपणकाले पि यावद्यावदहंकार इत्यादिना सकारणस्याहंकारविलयप्रतिपादना
न्निजानंदस्याभिमयित्वमितिमर्वमनवद्यं ॥७८॥ ननु अस्मिन्नध्याये ब्रह्मानंदविवेचनस्यैव प्रकृत
त्वादिदानंदत्रयप्रतिपादनं प्रकृतासंगतमित्याशंक्य तयोर्ब्रह्मानंदजन्यत्वेन तद्बोधोपयोगित्वा
न्न प्रकृतासंगतमित्यभिप्रायेणाह ॥ तयोरिति ॥ तयोश्च एवमानंदद्वैविध्ये सति यः स्वप्रकाश आनंदो
विषयानंदवासनानंदौ जनयति स ब्रह्मानंदो वेदितव्य इत्यर्थः ॥७८॥ कृत्वानुसंकीर्तनपूर्वकं

तयोश्च विषयानंदो वासनानंद इत्यमू ॥ आनंदौ जनयन्नास्ते ब्रह्मानंदः स्वयंप्रभः ॥७९॥
श्रुतियुक्त्यनुभूतिभ्यः स्वप्रकाशचिदात्मके ॥ ब्रह्मानंदे सुप्तिकाले सिद्धे सत्यन्यदा शृणु ॥

उत्तरग्रंथमवतारयति ॥ श्रुतीति ॥ श्रुतिभिः सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरू
पमेतीत्यादिभिरुदाहृताभिर्युक्तिभिः सुखमहमस्वाप्समित्यादिपरामर्शान्यथानुपपत्त्यादिभिरनुभूत्या
चाथापि तिकल्पितेन सौषुप्तानुभवेन च सुषुप्तिकाले स्वप्रकाशो ब्रह्मानंदः साधितः इतः परम
न्यदा जागरणाद्यवस्थायामपि यो ब्रह्मानंदावगमोपायो वक्ष्यते तं शृणु इत्यर्थः ॥८०॥ २३

प्रतिज्ञातमेव ब्रह्मानंदावगमोपायं दर्शयितुं तदुपोद्घातत्वेन सनिमित्तां जीवस्यावस्थात्रयप्राप्तिं
दर्शयति ॥ य आनंदमय इति ॥ सुप्तौ सुषुप्तिकाले विलीनावस्थ आनंदमयशब्देन कथ्यत इत्युक्तो
य आनंदमयः स विज्ञानशब्दाभिधेयबुद्ध्युपाधिमत्त्वेन विज्ञानमयतां प्राप्य स्थानभेदतो वक्ष्यमाण
स्थानविशेषयोगेन स्वप्नं जागरणं वा कर्मानुसारेण गच्छति ॥८१॥ इदानीं जाग्रदाद्यवस्थोपयोगि

य आनंदमयः सुप्तौ स विज्ञानमयात्मतां ॥ गत्वा स्वप्नं प्रबोधं वा प्राप्नोति स्थानभेदतः ॥८१॥
नेत्रे जागरणं कंठे स्वप्नः सुप्तिर्हृदंबुजे ॥ आपादमस्तकं देहं व्याप्य जागर्ति चेतनः ॥
॥८२॥ देहतादात्म्यमापन्नस्तप्तायःपिंडवत्ततः ॥ अहं मनुष्य इत्येवं निश्चित्यैवावतिष्ठते
॥८३॥

नीस्थानानि दर्शयति नेत्रस्वकंठदेहोपलक्षणपरतामभिप्रेत्य नेत्रे जागरणमित्यं
शार्थमाह ॥ आपादेति ॥ चेतनो जीवः ॥८२॥ देहं व्याप्येत्यनेन विवक्षितमर्थं दृष्टांतप्रदर्शनेन स्पष्टय
ति ॥ देहतादात्म्यमिति ॥ तत्र प्रमाणमाह ॥ अहमिति ॥ यतो मनुष्यत्वादिजातिदेहेन तादात्म्यं प्राप्त ततः
अहं मनुष्य इत्येवं निश्चित्य संशयादिरहितज्ञानेन गृहीत्वैवावतिष्ठते ॥८३॥ देहतादात्म्याभिमान

नेत्रइति। नेत्र

उदासीन इति। तत्र सुखदुःखित्वयोः कर्मजन्यत्वज्ञापनाय विशेषणं तयोः सुखदुःखयोरत्र
नुकूलं दर्शयति। सुखेति। ८४। तयोश्च सुखदुःखयोः निमित्तभेदात् द्वैविध्यमाह। बाह्येति। न
त्वौदासीन्यं कुतः स्यादित्यत आह। सुखदुःखेष्विति। वक्ति नैव विवक्षया बहुवचनं। ८५। यदर्थं नाय
हाकपमस्त्रंदेतदानीं दर्शयति। न कापीति। सर्वोपि तत्र इदानीं मम कापि चिंता गृहादिविषयानाम्

उदासीनः सुखी दुःखीत्यवस्थात्रयमेष सौ। सुखदुःखे कर्मकार्ये त्वौदासीन्यं स्वभावतः॥८४॥
बाह्यभोगान्मनोराज्यात्सुखदुःखे द्विधा मते। सुखदुःखांतरालेषु भवेत्तूष्णीं व्यवस्थितिः॥८५॥ न
कापि चिंता मेद्यासीत्सुखमासमिति ब्रुवन्। औदासीन्ये निजानंदभानं वक्ति विवेकिनः॥८६॥
अहमस्मीत्यहंकारसामान्याच्छादितत्वतः। निजानंदो न मुख्योयं किंतु सौ तस्य वासना॥८७॥

नास्ति त्वितश्चतः सुखं यथा न च लिंगपानिष्टापि निवदन्नौदासीन्यकाले स्वरूपानंदस्फुरणं ब्रूते इत्य
तो जागरणावस्थायामपि निजानंदभानमुक्तं तस्य वगंतव्यमित्यभिप्रायः। ८६। नन्वौदासीन्येऽवभा
स्यमानस्य निजानंदत्वे तस्य ब्रह्मानंदत्वात् पूर्णकारानंदत्वानन्या। दिमत्वं त्वाहंकारसामान्याच्छादितत्वा 

दहमस्मीति दिवसोहमित्यादिविशेषशून्योऽहमस्मीत्येवंरूपोयोहंकारसामान्येनाच्छादितत्वाद्यं मुख्यः स्वरूपानंदः न
हि तस्य किंरूपत्वमित्यत आह। किंत्वस्य वासनेति। ८७। मुख्यानंदाद्विविक्तवासनानंदस्य सद्भावे दृष्टांतमाह। नीरेति। नीर
पूरितकुंभस्य बहिरंगे स्पर्शनेनोपलभ्यमानं यच्छैत्यमस्ति तच्चाव्यजलं न भवति द्रवत्वानुपलंभात्। किं तर्हि
न दृश्यत इत्यत आह। किंत्विति। नीरगुणं कथमवगम्यत इत्यत आह। तेनेति। निमित्तस्पृष्टेनोपलभ्यमानेन शैत्येन
जलसत्तानुमातुमर्हतीत्यौदासीन्यकालानंदेनोपलभ्यमानेन शौम्यवादेति। ८८। एवं तेन नीरानुमापकत्वेनो

नीरपूरितभांडस्य बाह्ये शैत्यं न तज्जलं। किंतु नीरगुणस्तेन नीरसत्तानुमीयते॥८८॥ यावद्यावद
हंकारो विस्मृतोऽभ्यासयोगतः। तावत्तावत्सूक्ष्मदृष्टेर्निजानंदोनुमीयते॥८९॥
स्मृत्यप्रकृते किमा

यातम्मिमात्रांकत दत्तमनानंदस्यापि सुखानंदानुमापकत्वमभ्यासेनैवाह। यावदिति। अत्र मनसामयोग
तः। ज्ञानमात्मनिस्मृहत्ति निमित्ताद्यये बानंतआत्मनीति च स्मृतिहितनिरोधरूपमासवृत्त्याभ्यासयोगेन यावद्
इत्याहंकृतिविलयवशात् तत्र सम्यक्त्वता जायते तावत्तावन्निजानंदो निमक्तिर्विनीनिश्चत्वनुमीयते। अत्र
यमत्रप्रयोगः। अहंकारसंकोचविशेषविशिष्टक्षणो बुद्धिनीमादिक्षणः पक्षः संपूर्णस्वात्मानंदवि
क निजानंदाविर्भाववान्। अहंकारसंकोचविशेषयुक्तकालत्वादहंकारसंकोचयुक्ताद्यक्षणवदिति। ९०।

बुद्धिमोहस्य कोऽवधिरित्यत आह। सर्वेति। नहि सा निद्रैव स्यादित्यत आह। आलीनेति। सर्ववृत्तिविलयरूपांतःकरणस्वरूपविलयाभावोऽन्येयं निद्रा बुद्धेः कारणात्मनावस्थानं सुषुप्तिरित्याचार्यैरुक्तत्वादित्यर्थः। अंतःकरणस्वरूपविलयाभावे लिंगमाह। ततइति। यत्र सुषुप्तावहंकारविलयस्तत्र देहपातो दृष्टः। तु तदभावादविलीन इति गम्यते॥१००॥ फलितमाह। न द्वैतमिति। यस्मिन्काले द्वैतभानं नास्ति

स वासनाविस्मृतः सन् सूक्ष्मतां परमां व्रजेत्। आलीनत्वान्न निद्रैषा ततो देहोपि नो पतेत्॥१००॥ न द्वैतं भासते नापि निद्रा तत्रास्ति यत्सुखं। स ब्रह्मानंद इत्याह भगवानर्जुनं प्रति॥१॥
शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया। आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत्॥२॥

निद्रापि नास्तीति तस्मिन्काले उपलभ्यमानं यत्सुखमस्ति स ब्रह्मानंद इत्यर्थः। अयं ब्रह्मानंद इति कुतोऽवगतमित्याशंक्य कृष्णवाक्यादित्याह। इतीति। गीतायां षष्ठाध्याय इति शेषः॥१०१॥ तत्र कैः श्लोकैरुक्तवानित्याशंक्य तान् श्लोकान्स्वार्थक्रमानुसारेण। शनैरिति। श्लोकार्थः। धृतिगृहीतया धैर्ययुक्तया बुद्ध्या साधनभूतया शनैः शनैर्न सहसा उपरमेत्। मनउपरतिं कुर्यात्। किं यस्मिन्तमित्यत आह। आत्मेति। मनः आत्मसंस्थं आत्मनि संस्थं सम्यक्स्थितिरात्मैवेदं सर्वं न ततोऽन्यत्किंचिदस्ति 

नेवंरूपा यस्य तदात्मसंस्थं तथाविधं तथाविधं कृत्वा किंचिदपि न चिंतयेदेष योगस्य परमोऽवधिः॥२॥ एतत्संपादने प्रवृत्तो योगी प्रथमं किं कुर्यादित्यत आह। यत इति। चंचलं स्वभावदोषादत एवास्थिरं एकत्र विषये नियतमेवंविधं मनो यदा यदा यतो यतो यस्माद्यस्माच्छब्दादेर्निमित्तान्निश्चरति निर्गच्छति तत्तदा ततस्तस्माच्छब्दादेः सकाशान्नियम्य तेषां शब्दादीनां मिथ्यात्वादिदोषदर्शनेनाभासीकृत्य वैरा

यतो यतो निश्चरति मनश्चंचलमस्थिरं। ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्॥३॥
प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमं। उपैति शांतरजसं ब्रह्मभूतमकल्मषं॥४॥

ग्यभावनापूर्वकं निरुध्यैतन्मन आत्मन्येव वशं नयेत् आत्मवशवर्तितां संपादयेत्॥३॥ एवं योगमभ्यस्यतोऽभ्यासबलादात्मन्येव मनः प्रशाम्यति। मनःप्रशांतौ किं भवतीत्यत आह। प्रशांतेति। शांतरजसं प्रक्षीणमोहादिक्लेशरजसं अत एव प्रशांतमनसं प्रकर्षेण शांतं विक्षेपशून्यं मनो यस्य तं ब्रह्मभूतं ब्रह्मैवेदं सर्वमिति निश्चयवत्तया जीवन्मुक्तं अकल्मषं धर्माधर्मादिवर्जितमेनं योगिनं उत्तमं निरतिशयत्वादिदोषरहितं सुखमुपैति प्रगच्छति॥४॥

मेगृहीतार्थप्रपंचनपरानन्तरीयानेवश्लोकान्पठति। यत्रोपरमेति। चित्तं यत्र यस्मिन्काले योगसेवया
योगाभ्यासेन सर्वस्माद्विषयान्निवारितं सदुपरमते उपरतिं गच्छति। किंच यस्मिंश्चैव काले आत्मनास
माधिपरिशुद्धेनांतःकरणेनात्मानं परंज्योतिःस्वरूपं पश्यन्नुपलभमानः स्वस्मिन्नेव तुष्यति तुष्टिं न
जतेन विषयेष्वित्यर्थः।। किंच यत्र यस्मिन्काले आत्मनि स्थितो ऽयं योगी आत्यंतिकं अनंतमेव
मतीमानंतिकमनंतं बुद्धिग्राह्यं इंद्रियनिरपेक्षया बुद्ध्या गृह्यमाणं अतींद्रियं इंद्रियगोचरा

यत्रोपरमते चित्तं निरुद्धं योगसेवया।। यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति।।२०।। सुखमा
त्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं।। वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः।।२१।। यं लब्ध्वा चाप
रं लाभं मन्यते नाधिकं ततः।। यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते।।२२।। तीतमविषय

जनीतं यदतींद्रियं सुखं वेत्त्यनुभवति। किंच आत्मनि स्थितो ऽयं तत्त्वतः आत्मस्वरूपान्न चलति न प्रच्य
वते।।२१।। किंच यमात्मानं लब्ध्वा परं लाभं लाभांतरं ततो ऽधिकं न मन्यते आत्मलाभान्न परं विद्यत इति स्मृतेः
किंच यस्मिन्नात्मतत्त्वे स्थितो गुरुणा महतापि दुःखेन शस्त्रनिपातादिलक्षणेन प्रज्ञादवशान्न विचाल्य
ते।।२२।।



इदानीमुपपादितं योगं निगमयति। तं विद्यादिति। शनैः शनैरित्यादिना यावद्भिर्विशेषणैर्विशिष्ट
आत्मावस्थाविशेषो योग उक्तस्तं दुःखसंयोगवियोगं दुःखैः संयोगो दुःखसंयोगस्तेन वियोग
स्तं विपरीतलक्षणं यो योगसंज्ञितं योगशब्देन संज्ञितं विद्याज्जानीयात्। एवंविधयोगानुष्ठाने
किंचित्कर्तव्यताविशेषमाह। स निश्चयेनेति। स पूर्वोक्तो योगो निश्चयेनाध्यवसायेनानिर्विण्णचेत
सा निर्वेदरहितेन चित्तेन योक्तव्यो ऽनुष्ठेयः।।२३।। इदानीमुक्तमर्थमुपसंहरति। विगतकल्मषो विग



तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितं।। स निश्चयेन योक्तव्यो योगो निर्विण्णचेतसा।।२३।। युंज
न्नेवं सदात्मानं योगी विगतकल्मषः।। सुखेन ब्रह्मसंस्पर्शमत्यंतं सुखमश्नुते।।२८।। उत्सेक
उदधेर्यद्वत्कुशाग्रेणैकबिंदुना।। मनसो निग्रहस्तद्वद्भवेदपरिखेदतः।।२०।।

तपापादिकल्मषो योगांतरायवर्जितो योगी सदात्मानमेवं योगं यथोक्तप्रकारेण युंजन्ननुसंदधान
सुखेनानायासेन ब्रह्मसंस्पर्शं ब्रह्मणः संस्पर्शो यस्य सुखस्य तत्तं ब्रह्मसंस्पर्शं ब्रह्मस्वरूपं नूनमिति
यावत् अत्यंतमविनश्वरं निरतिशयसुखमश्नुते प्राप्नोतीत्यर्थः।।२८।। अनिर्वेदेन क्रियमाणो योगा
भ्यासः फलपर्यंतो भवतीति तत्र दृष्टांतमाह।।

पंचह
२३

उक्तोकश्चित्क्रमःप्रोणोहृतेनैकेनविंदुनाक्रियमाणउदयेरूपेणेकउत्पन्नवह्निःमैत्रनंपरिखेदाना
वेमनियदृक्कांसानेरनवृदेवतद्ब्रह्मनुमोनियहोपिश्रमराहित्येनक्रियमाणकांसांतरसिद्धेतु
हृंचयदिदिमोमास्मानमनसिधानियोक्तं॥१॥ानकेदलमयमयोगीनायामनिहितःकिंतुमै
त्रायणीयशाखायामपीमाहाबृहद्रथेतिमैत्रायणीयनामकेयजुःशाखांतेदृगकायनमाम

बृहद्रथस्यराजर्षेःशाकायन्योमुनिःपुरः॥पादमैत्रायणशाखायांसमाप्तिकपुरःसरं॥
॥२॥यथानिरिंधनोवह्निःस्वयोनावुपशाम्यति॥तथावृत्तिक्षयात्चित्तंस्वयोनावुपशा
म्यति॥३॥

श्रीहृषिःस्वशिष्यत्वेनोपासन्नस्यबृहद्रथस्यराजर्षेर्ब्रह्मसुखंसमाधानिधानपूर्व
कंयथाभवतितथोक्तवान्॥२॥केनप्रकारेणेनवानिमाक्तनस्यतिपादकांत्वदीयाश्चैवाभवतियथेति
निरिंधनोदग्धकाष्ठोवह्निःस्वयोनौस्वयोनौस्वकारणेतेजोमात्रेउपशाम्यतिज्वालादिरूपंविशेषाकारंप
रित्यज्यतेजोमात्ररूपेणयथावतिष्ठते॥तथातेनप्रकारेणवृत्तिःकरणमपिवृत्तित्रयान्निरोधसमाध्यभ्या
सेनराजसादिसकलवृत्तिनाशनकारणेसत्वमात्रउपशाम्यतिसत्वमात्रावशेषोभवतीत्यर्थः॥३॥ २३

ततःकिमतआह॥स्वयोनाविति॥सत्यआत्मनिविषयेकामोस्यास्तीतिसत्यकामीतस्मात्तथास्वयोना
वुपशांतत्वादेवइंद्रियार्थविमूढस्येंद्रियार्थेषुविषयेषुशब्दादिषुविमूढस्यविमुखस्यज्ञानस्यमनस्
मनसःकर्मवशत्वमनुगच्छंतीतिकर्मवशानुगाःससाधनाःसुखादयश्चानृतामायिकत्वज्ञानेनमिथ्या
भूतास्युरित्यर्थः॥४॥ननुचित्तोपशांतोजगन्मिथ्याभवतीतितदनुपपन्नंतदुपादानकत्वाभावात्
संसारंकथाह॥चित्तमेवेति॥यद्यपिस्वरूपेणचित्तोपादानकंजगन्नभवतितथापिनस्योगपत्वं

स्वयोनावुपशांतस्यमनसःसत्यकामिनः॥इंद्रियार्थविमूढस्यानृताःकर्मवशानुगाः॥४॥
चित्तमेवहिसंसारस्तत्प्रयत्नेनशोधयेत्॥यच्चित्तस्तन्मयोभवतिगुह्यमेतत्सनातनं॥५॥

चित्तकारणमेव॥हिशब्देनानुभवानुसंधेयमाणमुक्तिःसुषुप्तौचित्तविलयेभोगाद्यदर्शनादितिभा
वःयतश्चित्तात्मकःसंसारश्चततस्तच्चित्तमेवप्रयत्नेनाभ्यासवैराग्यादिलक्षणेनशोधयेत्॥रजस्तमो
राहित्येनैकाग्र्यंकुर्यात्॥नत्वात्मनोविमुक्तयेच्चात्मेशोधनीयेनचित्तशिम्रात्वंस्याह॥यच्चित्तइति
मसंद्युपलक्षणंदेहिमात्रस्ययोदेहीयत्रौपरिमुच्चारेविषयेचित्तवान्भवतिसतन्मयस्तदात्मकः

एवंतत्साक्ष्यविकल्पयोरात्मन्येवसमारोपणात्॥ एतत्स्मरणात्तेनेदमनादिसिद्धंसुखदुःखसं॥ एतदु
क्तं भवति। स्वभावतः शुद्धस्यात्मनो यतश्चित्तसंपर्कादिदं संसरित्वं। ध्यायतीव लेलायतीवेति श्रुतेः। अत
श्चित्तसंशोधनेनात्मनः संसारनिवृत्तिरिति॥ ॥ अनन्तानादिभवपरंपरोपार्जितसुकृतदुःखप्रदौ पुण्य
पापकर्मणी सतो चित्तशोधनेनापि कथमात्मनः संसारनिवृत्तिर्न विप्रतिपत्तौ साक्षात्कारेण प्रसादोपल
क्षितब्रह्मानुसंधानेन सकलकर्मक्षयोपपत्तेर्नैवमिति परिहरति। चित्तस्येति। हिरवधारणेन तद्य

चित्तस्य हि प्रसादेन हंति कर्म शुभाशुभं। प्रसन्नात्मात्मनि स्थित्वा सुखमक्षयमश्नुते॥२०॥

येषां कालत्रयेमशेषोक्तं तत्प्रकृतेर्तैवमेवेहात्मसर्वेपापानः प्रदूयंते। उपपातकेषु सर्वेषु पातकेषु
महत्सु च। प्रविश्य रजनीपादं ब्रह्मध्यानं समाचरेदिमादिस्मृतिस्मृतिप्रसिद्धियोतयति। ततः किं
मित्यत आह प्रसन्नेति प्रसन्न आत्मा चेतो यस्य स तथोक्तः। आत्मनि स्वरूपभूते अद्वितीयानंदलक्ष
णे ब्रह्मणि स्थित्वा तदेवाहमिति निश्चयेन तद्रूपतां परित्यज्य चिन्मात्ररूपेणैव स्थायाऽक्षयमवि ब्रह्मा. २७
नाशि यत्सुखं स्वरूपभूतं तदश्नुते॥ ॥

प्रसन्नात्मात्मनि स्थित्वेत्युक्तमेवार्थं दृष्टांतोक्तिपुरःसरं द्रढयति। समासक्तमिति। प्राणिश्चित्तं विषय
एव गोचरं इंद्रियप्रचारभूमिस्तस्मिन्यथा स्वभावतः सम्यगासक्तं भवति। तदेव चित्तं ब्रह्मणि प्रस
न्ने परमात्मनि यद्येवमासक्तं स्यात्तर्हि कः संसारान्न मुच्येत सर्वोपि मुच्येत एवेत्यर्थः॥ ॥ उ
क्तार्थे दार्ढ्याय मनसो वांतरभेदमाह। मन इति। तत्र कारणमाह। अशुद्धमिति। कामः स्वोपलक्षणं

समासक्तं यथा चित्तं जंतोर्विषयगोचरे। यद्येवं ब्रह्मणि स्यात्तत्को न मुच्येत बंधनात्॥
२१॥ मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च। अशुद्धं कामसंपर्काच्छुद्धं कामविवर्जितं॥२२॥
मन एव मनुष्याणां कारणं बंधमोक्षयोः। बंधाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतं॥ ॥ सम
माधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत्

क्रोधादेरपि॥ ॥ द्विविधस्यैव तस्य क्रमेण संसारमोक्षयोर्हेतुतां दर्शयति। मन एवेति। प्रसन्नात्मात्म
नि स्थित्वा सुखमक्षयमश्नुत इत्युक्तमेवार्थं स्फुटयति। स्वयमेव प्रपंचयति। समाधीति। आत्मनि प्रत्यक्स्वरूपे
निवेशितस्य समाधिनिर्धूतमलस्य समाधिना प्रत्यक्ब्रह्मैक्यगोचरवृत्त्या। ध्वस्तनिर्धूतमलस्यानि
शेषेण निवारितरजस्तमोमलस्य चेतसस्तस्मिन्समाधौ यत्सुखमुत्पद्यते तदा समाधावुत्पन्नं तत्सुखं गिरा वा

वर्णयितुं न शक्यते ॥ अलौकिकसुखत्वादित्यर्थः किं स्वयं तत्स्वरूपं नूतं सुखं स्वांतःकरणेनैव गृह्यते ॥१९॥
नन्वसौ समाधेर्दुर्लभत्वात्कथं अनेन ब्रह्मानंदनिश्चयः स न वइत्याशंक्याह ॥ यद्यपीति ॥ अस्य समाधेः सं
ततस्यासंभवेपि क्षणिकस्य तस्य संभवात्तेनैव ब्रह्मानंदो निश्चेतुं शक्यत इत्यर्थः ॥१९॥ ननु तदस्मा
यस्य वर्णने सहृत्तस्य पिके चिदानंदनिश्चयः स्मात्वाहम्मिरवाक्तंत इत्याशंक्याह अर्चादिरहितानां तथात्वेपि

न शक्यते वर्णयितुं तदा गिरा स्वयं तदंतःकरणेन गृह्यते ॥१९॥ यद्यप्यसौ स्थिरं कालं समाधि
दुर्लभो नृणां ॥ तथापि क्षणिको ब्रह्मानंदं निश्चाययत्यसौ ॥ अथालुर्व्यसनी योत्र निश्चितो त्वेकस
र्वथा ॥ निश्चिते तु सकृत्तस्मिन् विश्वसित्यन्यदा स्वयं ॥२०॥

अर्चादिसमंतान्निश्चयो न वेत्याह ॥ अथालुरिति ॥ व्यसनं सर्वथा संपादयिष्यामीत्याग्रहः तद्वान् व्यसनी त्व
न समाधौ सर्वथा स्वरूपं ततः किमित्यत आह ॥ निश्चिते इति ॥ तस्मिन्ब्रह्मानंदे सकृदेकदा क्षणिकस
माधौ निश्चिते सति निश्चयं सकृत् निश्चयवान् तदापि इतरस्मिन्नपि कालेपि विश्वसिति ब्रह्मानंदोस्तीति वि
श्वासं करोति ॥२०॥ ॥ २९

ततोपि किं तत्राह ॥ तादृगिति ॥ तादृक् कुमारान् अर्चादिगुरुः स्मरं महत्तं निश्चयवान् अनुरूपश्चोदासीन्यद् उपाय
अपि तु पलस्य मानो पूर्वोक्तानानंदवासना उपेक्ष्य तत्स्मरो सुरमानंदे तत्स्य र्यवान्न्तत्वात् मेवनावयः ॥२१॥
एवं व्यवहारकाले निजानंदभावेयन्नासत्त्वदृष्टांतमाह ॥ परेति ॥२२॥ दार्ष्टांतिके योजयति ॥ एवमिति ॥२३॥ धीर
स्वाक्षार्थमाह ॥ धीरत्वमिति ॥ इंद्रियाणां विषयाभिमुखेन पुरुषाकर्षणसामर्थ्येपि स्वरूपसुखानुसंधा

तादृक् कुमानुदासीनकालेप्यानंदवासनां ॥ उपेक्ष्य सुरमानंदं नावयत्येव तत्परः ॥२१॥ परव्यस
निनी नारी व्यग्रापि गृहकर्मणि ॥ तदेवास्वादयत्यंतः परसंगरसायनं ॥२२॥ एवं तत्त्वे परे शुद्धे धीरो स्व
विश्रांतिमागतः ॥ तदेवास्वादयत्यंतर्बहिर्व्यवहरन्नपि ॥२३॥ धीरस्तु भोग्यभावेपि नहास्वादरोच
या ॥ तिरस्कृत्याखिलग्राणि निचितायाः प्रवर्तनं ॥२४॥ भारवाही शिरो भारं मुक्त्वास्ते विश्रमं ततः ॥
संसारव्याहृतित्यागे तादृग्बुद्धिस्तु विश्रमः ॥२५॥ नेव्यावसर्वाणींद्रियाणि तिरस्कृत्यानंदानुसंधान
एव अवतिष्ठन्नत्वं धीरत्वमित्यर्थः ॥२४॥ विश्रांतिं सदृष्टांतं विवृद्धिनमर्थं सदृष्टांतमाह ॥ भारवाहीति ॥
यथा लोके भारवहनरूपः श्रमहेतुं शिरसि स्थितं भारं परित्यज्य श्रमरहितो वर्तते ॥ तथा संसारव्यापारत्या
गे सति श्रमरहितत्वात् सर्वमिति जोपमानाया बुद्धिः सा विश्रमशब्देनोच्यत इत्यर्थः ॥२५॥

इदानीं फलितमर्थमाह ॥ विश्रांतिमिति ॥ परमां निरतिशयां विश्रांतिं उक्तलक्षणं प्राप्तः पुरुषः स्व
यमौदासीन्यदशायां यथा परानंदास्वादनेन तन्मयो न भवति ॥ एवं सुखदुःखहेतुप्राप्तिकालेऽपि तद
नुसंधानं परित्यज्य निजानंदास्वादन एव तत्पर्यवान् भवेदित्यर्थः ॥ ६ ॥ ननु दुःखस्य प्रतिकूलत्वेन तद
नुसंधानेऽभावेऽपि वैषयिकसुखस्यानुकूलत्वेन रुचिपरिचयमानत्वात्तदनुसंधाने व्याकुलो न भवेदित्या

विश्रांतिं परमां प्राप्तस्त्वौदासीन्ये यथा तथा ॥ सुखदुःखदशायां च तदानंदैकतत्परः ॥ ६ ॥ अग्नि
प्रवेशहेतौ धीः शृंगारे यादृशी तथा ॥ धीरस्योदेति विषयेऽनुसंधानविरोधिनि ॥ ७ ॥

शृंगारस्य विषयसंपादनादिद्वारा जीवबहिर्मुखत्वापादनेन निजानंदानुसंधानविरोधित्वात्तद्वदपि
विवेकिनो न जायत इति दृष्टांतपूर्वकमाह ॥ अग्नीति ॥ अग्निप्रवेशहेतौ निमित्ते च्छायां दृढतरायां
सत्यां तद्विलंकारणेऽलंकारादौ यथा प्रतिकूलवृद्धैर्वैरस्यबुद्धिरुत्पद्यते ॥ एवं वैराग्यादिसाधनसंपन्नस्य
विवेकिनो ब्रह्मानुसंधानविरोधिनि विषयसुखेऽपीत्यर्थः ॥ ७ ॥ ३०

मानुद्विरोधिनि विषयसुखेच्छा उत्पद्यते मौढ्यस्य साक्षाद्बहिर्मुखत्वहेतौ विषयेऽपि किं न भवतीत्यत आह ॥ अ
विरोधिनीति ॥ दृष्टांतं विवृणोति ॥ एकैवदृष्टिरिति ॥ यथा काकस्य दृष्टिरिन्द्रियत्वेनैकेति दर्शनसाधनं चक्षु
रिंद्रियमेकमेव वामदक्षिणनेत्रयोर्गोलकयोः पर्यायेण गमनागमने करोति ॥ एवं विवेकिनो

अविरोधिसुखे बुद्धिः स्वानंदे च गमागमौ ॥ कुर्वन्नास्ते क्रमादेषा काकाक्षिवदितस्ततः ॥ ८ ॥
एकैव दृष्टिः काकस्य वामदक्षिणनेत्रयोः ॥ यात्यायात्येवमानंदद्वये तत्त्वविदो मतिः ॥ ९ ॥ भुं
जानो विषयानंदं ब्रह्मानंदं च तत्त्ववित् ॥ द्विभाषाभिज्ञवद्विद्यादुभौ लौकिकवैदिकौ ॥ १० ॥

बुद्धिरप्यानंदद्वयपरेत्यर्थः ॥ ९ ॥ दार्ष्टांतिकं प्रपंचयति ॥ भुंजान इति ॥ तत्त्ववित् विषयान् भुंजानस्तज्जन्यं
विषयानंदमुपनिषद्वाक्यादवगतं ब्रह्मानंदं च लौकिकवैदिकावुभौ विषयानंदब्रह्मानंदौ भाषाद्वय
वेदिवज्जानीयादित्यर्थः ॥ १० ॥

ननु दुःखानुभवदशायामुद्वेगे सति कथं निजानंदानुभव इत्याशंक्याह ॥ दुःखेति ॥ यतोयमात्माकार
एणाद्विद्विवेकी ॥ द्विदृक् लौकिकवैदिकव्यवहारयोरुभयोरपि वेत्ता अतो दुःखप्राप्तावपि पूर्ववदज्ञान
दशायामिव न तस्योद्वेगः विवेकेन तदा तदा बाध्यमानत्वादतो दुःखानुभवकालेपि निजानंदानुसंधानं न
विरुध्यत इत्यर्थः ॥ युगपदुभयानुसंधाने दृष्टांतमाह ॥ गंगेति ॥ २१ ॥ फलितमाह ॥ इत्थमिति ॥ स्पष्ट

दुःखप्राप्तौ च नोद्वेगो यथा पूर्वं यतो द्विदृक् ॥ गंगामग्नार्द्धकायस्य पुंसः शीतोष्णधीर्य
था ॥१२१॥ इत्थं जागरणे तत्त्वविदो ब्रह्मसुखं सदा । भाति तद्वासनाजन्ये स्वप्ने तद्भासते तथा ॥१२२॥ ॥

सुखदुःखानुभवदशायां तत्त्वदृष्टिनौचेत्यर्थः ॥ न केवलं जागरण एव तज्ज्ञानं किंतु स्वप्नावस्थायाम
पीत्याह ॥ तद्वासनेति ॥ हेतुगर्भं विशेषणं ॥ जाग्रद्वासनाजन्यत्वात्स्वप्नस्य तत्रापि तद्ब्रह्मसुखं तथा ब्रह्मा
जाग्रदवस्थायामिव भासत इत्यर्थः ॥ १२२ ॥ ३१

ननु स्वप्नस्यानंदानुभववासनाजन्यत्वे सति ब्रह्मानंदावभासेत तस्याशंक्याह ॥ अविद्येति ॥ न केवलं ब्रह्म
आनंदवासनाबलाज्जाग्रदेव स्वप्नो जायते किंतु अविद्यावासनाबलादपि अतस्तद्वासनाजन्यत्वा
न ब्रह्मानंदस्यैव सुखाद्यनुभवो भवतीत्यर्थः ॥ १२३ ॥ एतावता ग्रंथसंदर्भेणोक्तमर्थं निगमयति ॥ ब्र
ह्मानंदेति ॥ ब्रह्मानंदनामके अध्यायपंचकात्मके ग्रंथेस्मिन्प्रथमेध्याये सुषुप्त्यवस्थायामोदासी

अविद्यावासनाप्यस्ति ततस्तद्वासनोत्थिते ॥ स्वप्ने मूर्खवदेवैष सुखं दुःखं च वीक्षते
॥१२३॥ ब्रह्मानंदाभिधे ग्रंथे ब्रह्मानंदप्रकाशकं ॥ योगीप्रत्यक्षमध्याये प्रथमेस्मिन्नुदी
रितं ॥१२४॥ ॥इति ब्रह्मानंदसमाप्तः॥ ॥

न्यकालेपि समाध्यवस्थायां सुखदुःखदशायां च स्वप्रकाशाद्विद्रूपब्रह्मानंदस्य प्रकाशकं यो
गप्रत्यक्षरूपं प्रत्यक्षमुक्तमित्यर्थः ॥ इत्थं योपयुक्तानामागम्यादीनां तेषामप्यत्र प्रदर्शितत्वात् ॥
॥१२४॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण श्री
रामकृष्णाख्यविदुषा विरचिते ब्रह्मानंदे योगानंदो नाम प्रथमोऽध्यायः ॥ ॥

ब्रला·
३२

राम
३२